Departme[...] in Mysore

S.S.L.C. EXAMINATION

THE SANSKRIT TEXT

1943

1,100 Copies

MYSORE:
PRINTED BY THE ASST. SUPDT., GOVT. BRANCH PRESS
1942

Price : Re. 0-7-3

गुरूपदेशः.

"ನಹಿ ಜ್ಞಾನೇನ ಸದೃಶಂ ಪವಿತ್ರಮಿಹ ವಿದ್ಯತೇ" ಎಂಬ ಸೂಕ್ತ್ಯನುಸಾರ ಜ್ಞಾನವೆಂಬುದು ಸರ್ವರಿಗೂ ಉಪಾದೇಯವಾದ ವಸ್ತು. ಅದನ್ನು ಪಡೆಯಬೇಕಾದರೆ ವಿದ್ಯಾರ್ಜನೆಯು ಮುಖ್ಯ. ವಿದ್ಯೆಯು ಆದಿ ಕಾಲದಿಂದಲೂ ಗುರುವಿನಿಂದ ಶಿಷ್ಯನಿಗೆ ಪರಂಪರೆಯಾಗಿ ಬೋಧಿಸಲ್ಪಡುತ್ತ ಬಂದಿರುವುದು. ಸಂಪ್ರದಾಯದ ಪ್ರಕಾರ ಶಿಷ್ಯನು ಗುರುಕುಲವಾಸಮಾಡಿ ವೇದಾಧ್ಯಯನವನ್ನು ಪೂರೈಸಿ ಗುರುವಿನ ಅನುಗ್ರಹಪಡೆದು ತನ್ನ ಶ್ರೇಯಸ್ಸಾಧನೆಯಲ್ಲಿ ನಿರತನಾಗುತ್ತಾನೆ. ಈ ಸಂದರ್ಭದಲ್ಲಿ ಬೀಳ್ಕೊಡಲು ಬಂದ ಪ್ರಿಯಶಿಷ್ಯನನ್ನು ಗುರುವು "ಸತ್ಯಂ ವದ, ಧರ್ಮಂ ಚರ" ಇತ್ಯಾದಿ ವಾಕ್ಯಗಳ ಮೂಲಕ ಅನುಗ್ರಹಿಸುವನು. ವೇದ, ವೇದಾಂಗ, ಪುರಾಣ, ಧರ್ಮಶಾಸ್ತ್ರ, ಮೀಮಾಂಸಾ ಮತ್ತು ನ್ಯಾಯಶಾಸ್ತ್ರಗಳೆಂಬ ಹದಿನಾಲ್ಕು ವಿದ್ಯೆಗಳ ಮೂಲಕ ಜ್ಞಾನವನ್ನು ಸಂಪಾದಿಸಿದಮೇಲೆ ಲೋಕವ್ಯವಹಾರದಲ್ಲಿ ನಾವು ಹೇಗೆ ವರ್ತಿಸಬೇಕೆಂಬುದನ್ನು ಪವಿತ್ರವಾದ ತೈತ್ತಿರೀಯೋಪನಿಷತ್ತಿನಿಂದ ಸಂಗ್ರಹಿಸಿರುವ ಈ ಭಾಗವು ವ್ಯಕ್ತಪಡಿಸುತ್ತದೆ. ಈ ನವೀನ ಕಾಲದಲ್ಲಿಯೂ ಇದು ಛಾತ್ರವರ್ಗಕ್ಕೆ ಪ್ರಯೋಜನಕಾರಿಯೆಂಬುದು ನಿಸ್ಸಂದೇಹವಾದ ವಿಷಯ.

गुरूपदेशः

---

[1]वेदमनूच्या[2]चार्योऽन्ते[3]वासिनमनुशास्ति[4] । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः[5] । आचार्याय[6] प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः[7] । सत्या[8]न्न प्रमदितव्यम् । धर्मा[9]न्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् ॥ १ ॥

देवपितृकार्याभ्यां न प्रमदितव्यम् । [10]मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्य[11]नवद्यानि कर्माणि । तानि सेवितव्यानि । नो इतराणि । यान्यस्माकꣳ सुचरितानि । तानि त्वयोपास्यानि ॥ २ ॥

नो इतराणि । ये के चास्मच्छ्रेयाꣳसो ब्राह्मणाः । तेषां त्वयासने न प्रश्वसितव्यम् । श्रद्धया देयम् । अश्रद्धयाऽदेयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम् । अथ यदि ते कर्म विचिकित्सा वा वृत्तविचि[12]कित्सा वा स्यात् ॥ ३ ॥

ये तत्र ब्राह्मणास्संमर्शिनः । यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः । एष आदेशः । एष उपदेशः । एषा वेदोपनिषत् । एतदनुशासनम् । एवमुपासितव्यम् एवमुचैतदुपास्यम् ॥ ४ ॥

ಉಮಾಮಹೇಶ್ವರಲೀಲಾ.

ಈ ಸಂದರ್ಭವನ್ನು ಕಾಳಿದಾಸ ಮಹಾಕವಿಯ ಕುಮಾರಸಂಭವ ದಿಂದ ಸಂಗ್ರಹಿಸಲಾಗಿದೆ. ಪಾರ್ವತೀದೇವಿಯು ಪರಮೇಶ್ವರನನ್ನೇ ಮದುವೆಯಾಗಬೇಕೆಂಬ ಉದ್ದೇಶದಿಂದ ಉಗ್ರವಾದ ತಪಸ್ಸನ್ನು ಮಾಡಿ ದಳು. ಪರಮೇಶ್ವರನೂ ಪಾರ್ವತಿಯನ್ನೇ ಪರಿಗ್ರಹಿಸಬೇಕೆಂದು ತಪೋ ನಿಷ್ಠನಾದನು. ಈ ಚಿರಂತನ ವಧೂವರರ ಪ್ರಣಯ ಚರಿತ್ರೆಯಲ್ಲಿ ವಧುವಾದ ಉಮಾದೇವಿಯು ವರನನ್ನು ಒಲಿಸಿದ ಬಗೆಯು ಈ ಭಾಗ ದಲ್ಲಿ ವರ್ಣಿತವಾಗಿದೆ.

ಕಾಳಿದಾಸನು ಪ್ರಪಂಚದ ಕವಿವರೇಣ್ಯರಲ್ಲೊಬ್ಬನೆಂದು ಎಲ್ಲರಿಗೂ ತಿಳಿದ ಸಂಗತಿ. ರಚಿತವಾದಂದಿನಿಂದ ಅವನ ಕೃತಿಗಳು ಖ್ಯಾತಿಗೊಂಡು ಜನತೆಯಲ್ಲಿ ಗೌರವವನ್ನೂ ವಿಶೇಷವಾಗಿ ಆದರವನ್ನೂ ಪಡೆದವು. ಸಂಸ್ಕೃತ ವಿದ್ಯಾಭ್ಯಾಸದಲ್ಲಿ ಕಾವ್ಯಪಾಠವೆಂದರೆ ರಘುವಂಶ, ಕುಮಾರಸಂಭವ ಇವನ್ನು ಮೊದಲು ಓದಬೇಕು; ನಾಟಕವೆಂದರೆ ಶಾಕುಂತಲ. ಹೀಗೆ ನಿತ್ಯವೂ ಜನವೆಲ್ಲಾ ಅವನ ನಾಮಸ್ಮರಣೆಯನ್ನು ಮಾಡುತ್ತಿರುವಾಗ ಅವನು ಯಾರು, ಯಾವ ಕಾಲದಲ್ಲಿ ಯಾವ ದೇಶವನ್ನು ಮಂಡಿಸಿದನು, ಲೋಕೋತ್ತರವಾದ ಕಾವ್ಯಪದ್ಧತಿಯನ್ನು ತೋರಿಸಿಕೊಟ್ಟ ಅವನ ಜೀವನ ಚರಿತ್ರೆ ಎಂತಹುದು ಎಂಬೀ ಮೊದಲಾದ ವಿಷಯಗಳು ಜನರ ಅರಿವಿಗೆ ಬಾರದಿರುವುದು ಆಶ್ಚರ್ಯಕರವಾಗಿದೆ. ಆದರೂ ನವೀನ ಸಂಶೋಧನೆಯ ಪ್ರಕಾರ ವಿದ್ವಾಂಸರು ಯಾವರೀತಿ ಈ ವಿಷಯಗಳನ್ನು ಊಹೆಯಿಂದ ಸಮರ್ಥಿಸಿದ್ದಾರೆಂಬುದನ್ನು ಇಲ್ಲಿ ಸಂಕ್ಷೇಪವಾಗಿ ತಿಳಿಯಬಹುದು.

ಕಾಳಿದಾಸನು ಮೊದಲು ಮೊದಲು ಏನೂ ತಿಳಿಯದ ಮೂಢನಾಗಿ ದ್ದನು; ಒಂದಾನೊಂದು ಸಮಯದಲ್ಲಿ ಕಾಳಿಕಾದೇವಿಯ ಪ್ರಸಾದದಿಂದ ಕವಿತಾಶಕ್ತಿಯನ್ನೂ ದಿವ್ಯ ಪಾಂಡಿತ್ಯವನ್ನೂ ಪಡೆದು ಅಂದಿನಿಂದ ಕಾಳಿದಾಸ ನೆಂದು ಪ್ರಸಿದ್ಧನಾದನು. ಧಾರಾನಗರದ ಭೋಜರಾಜನಿಗೂ ಅವನಿಗೂ ಬಹಳ ಸ್ನೇಹವಿತ್ತು; ಈತನು ಮಾಘ, ಭಾರವಿ, ಭವಭೂತಿ, ಬಾಣಭಟ್ಟ ಮೊದಲಾದ ಕವೀಶ್ವರರ ಸಂಘದಲ್ಲಿ ಅಗ್ರಗಣ್ಯ; ಸಮಸ್ಯಾಪೂರಣದಲ್ಲಿ ಸಾಟಿ ಯಿಲ್ಲದವನು. ಒಂದು ಸಾರಿ ಸಿಂಹಳದ್ವೀಪದ ದೊರೆಯಾದ ಕುಮಾರದಾಸನ ಆಸ್ಥಾನಕ್ಕೆ ಹೋಗಿದ್ದಾಗ ಒಬ್ಬ ನರ್ತಕಿಯಿಂದ ಮರಣಹೊಂದಿದನು. ಈ

ಪ್ರಕಾರ ಕಾಳಿದಾಸನ ವಿಷಯದಲ್ಲಿ ವಿಧವಿಧವಾದ ಕಥೆಗಳು ಪ್ರಚಾರದಲ್ಲಿವೆ. ಆದರೆ ಇವೆಲ್ಲಾ ನಂಬುವುದಕ್ಕೆ ಅನರ್ಹವಾದ ಶುಷ್ಕಕಲ್ಪನೆಗಳೆಂದು ಹೇಳಬಹುದು. ಪಂಕ್ತಿ ಪಂಕ್ತಿಯಲ್ಲಿಯೂ ಪ್ರಕಾಶಿಸುವ ಅನುಪಮ ಕವಿತಾಶಕ್ತಿ, ವಿಷಯಗಾಂಭೀರ್ಯ, ಅತ್ಯುತ್ತಮ ದಶೆಯಲ್ಲಿದ್ದ ಆರ್ಯಸಂಸ್ಕೃತಿ ಇವುಗಳನ್ನು ನೋಡಿದರೆ ದೇವತಾನುಗ್ರಹವನ್ನು ಪಡೆದ ಮೂಢನ ದಿವ್ಯ ಕವಿತೆಯೆಂದು ನಂಬುವುದು ಕಷ್ಟ. ಚರಿತ್ರೆಯ ಪ್ರಕಾರ ಕ್ರಿ. ಶ. ಹನ್ನೊಂದನೆಯ ಶತಮಾನದಲ್ಲಿದ್ದ ಧಾರಾನಗರದ ಭೋಜರಾಜನಿಗೂ ನಮ್ಮ ಕಾಳಿದಾಸನಿಗೂ ಶತಮಾನಗಳ ಅಂತರವೆಂಬುದು ನಿರ್ವಿವಾದ. ಹಾಗೆಯೇ ಸಿಂಹಳದ್ವೀಪದ ಕುಮಾರದಾಸನ ಪ್ರಸಂಗವೂ ಪ್ರಮಾಣರಹಿತವಾಗಿದೆ.

ವಿಕ್ರಮಾದಿತ್ಯರಾಯನ ಒಡ್ಡೋಲಗದ ನವಮಣಿಗಳಲ್ಲಿ ಕಾಳಿದಾಸನೊಬ್ಬನು—ಎಂಬ ಮತ್ತೊಂದು ಇತಿಹಾಸವು ಹೆಚ್ಚು ಬಳಕೆಯಲ್ಲಿದೆ. ಅದನ್ನು ಒಪ್ಪಲೂಬಹುದು. ಆದರೆ ವಿಕ್ರಮಾದಿತ್ಯನೆಂಬ ಹೆಸರಿನಿಂದ ಪ್ರಸಿದ್ಧರಾದ ರಾಜರು ಹಲವರಿದ್ದಾರೆ. ಕ್ರಿ. ಪೂ. 57 ರಲ್ಲಿ ಶಕರನ್ನು ಸೋಲಿಸಿ ವಿಕ್ರಮಶಕೆಯನ್ನು ಸ್ಥಾಪಿಸಿದವನು ವಿಕ್ರಮಾದಿತ್ಯ. ಗುಪ್ತರ ಕಾಲದಲ್ಲಿ ಕ್ರಿ. ಶ. 375 ರಿಂದ 413ರ ವರೆಗೆ ಆಳಿದ ಎರಡನೇ ಚಂದ್ರಗುಪ್ತನು ವಿಕ್ರಮಾದಿತ್ಯನೆಂಬ ಹೆಸರನ್ನು ಪಡೆದನು. ಅವನ ಮೊಮ್ಮಗನಾದ ಸ್ಕಾಂದಗುಪ್ತನೂ ಅದೇ ಬಿರುದನ್ನು ತಾಳಿದ್ದನು. ಇವರಲ್ಲಿ ಯಾವ ವಿಕ್ರಮಾದಿತ್ಯನ ಕಾಲದಲ್ಲಿ ಕಾಳಿದಾಸನಿದ್ದನೆಂಬುದನ್ನು ನಿರ್ಧರಿಸುವುದು ಕಷ್ಟ. ಶಕೆಯನ್ನು ಸ್ಥಾಪಿಸಿದ ವಿಕ್ರಮಾದಿತ್ಯರಾಯನ ಆಸ್ಥಾನದಲ್ಲಿಯೇ ಇದ್ದನೆಂದು ಕೆಲವರು ನಂಬುತ್ತಾರೆ. ಗುಪ್ತರ ಎರಡನೇ ಚಂದ್ರಗುಪ್ತನ ಕಾಲದವನೆಂದು ಮತ್ತೆ ಕೆಲವರು ಸಮರ್ಥಿಸುತ್ತಾರೆ.

ಭರತಖಂಡದ ಸೌಭಾಗ್ಯವು ಅತ್ಯುತ್ತಮ ಸ್ಥಿತಿಯಲ್ಲಿದ್ದಾಗ ಕಾಳಿದಾಸನು ಅವತರಿಸಿದ್ದನೆಂಬುದು ಮಾತ್ರ ನಿಜ. ಏಕೆಂದರೆ, ಸಾಮಾನ್ಯವಾಗಿ ಅವನ ಬರೆವಣಿಗೆಯಲ್ಲಿ ಒಂದು ಸುಖಮಯವಾದ ದುಃಖದೂರವಾದ ಚಿತ್ತವೃತ್ತಿಯು ದೇದೀಪ್ಯಮಾನವಾಗಿದೆ. ಹಿಮಾಲಯದ ದೇವದಾರು, ಕಳಿಂಗದೇಶದ ತಾಂಬೂಲ, ಮಲಯಾಚಲದ ಚಂದನ, ಕೇರಳಪ್ರಾಂತದ ಖರ್ಜೂರ, ಸಿಂಧುದೇಶದ ಮರಳು, ಕಾಶ್ಮೀರದ ಕುಂಕುಮಕೇಸರಿ— ಇವೇ ಮುಂತಾದ ಅಂಶಗಳನ್ನೊಳಗೊಂಡ ರಘುರಾಜನ ದಿಗ್ವಿಜಯ ವರ್ಣನೆಯಿಂದ ಕಾಳಿದಾಸನಿಗೆ ನಮ್ಮ ದೇಶದ ಅನೇಕ ಪ್ರಾಂತಗಳ ಪರಿಚಯವಿತ್ತೆಂದು ಹೇಳಬಹುದು. ಬಹುಶಃ ಗುಪ್ತಸಾಮ್ರಾಜ್ಯ ವೈಭವವು ಇವನ ಗ್ರಂಥಗಳಲ್ಲಿ ಪ್ರತಿಫಲಿತವಾಗಿರುವುದು.

ಇದಕ್ಕೆ ಉಪಷ್ಟಂಭಕವಾಗಿ ಇನ್ನೂ ಕೆಲವು ವಿಷಯಗಳನ್ನೂ ಜ್ಞಾಪಿಸಿಕೊಳ್ಳುವುದು ಉಚಿತ. ಮಾಲವಿಕಾಗ್ನಿಮಿತ್ರವೆಂಬ ತನ್ನ ನಾಟಕದ

ಪ್ರಸ್ತಾವನೆಯಲ್ಲಿ ಕ್ರಿ. ಶ. ಸುಮಾರು ಮೂರನೇ ಶತಮಾನದಲ್ಲಿದ್ದ ಭಾಸ ಕವಿಯನ್ನು ಕೊಂಡಾಡಿರುವುದರಿಂದ ಅವನಿಗಿಂತ ಕಾಳಿದಾಸನು ಈಚಿನವನು. ಕ್ರಿ. ಶ. 634ರಲ್ಲಿ ಹುಟ್ಟಿದ ಐಹೋಳೆಯ ಶಾಸನದಲ್ಲಿ ಕಾಳಿದಾಸ ಭಾರವಿ ಮೊದಲಾದ ಕವಿಗಳು ಕೀರ್ತಿತರಾಗಿದ್ದಾರೆ. ಕ್ರಿ. ಶ 606 ರಿಂದ 648ರ ವರೆಗೆ ರಾಜ್ಯವಾಳಿದ ಶ್ರೀ ಹರ್ಷಚಕ್ರವರ್ತಿಯ ಆಸ್ಥಾನದಲ್ಲಿದ್ದ ಬಾಣ ಭಟ್ಟನು ತನ್ನ ಹರ್ಷ ಚರಿತ್ರೆಯೆಂಬ ಗ್ರಂಥದ ಉಪೋದ್ಘಾತದಲ್ಲಿ ಇತರ ಕವಿವರ್ಯರ ಮಧ್ಯದಲ್ಲಿ ಕಾಳಿದಾಸನ "ಸೂಕ್ತಿ" ಗಳನ್ನು ಹೊಗಳಿದ್ದಾನೆ* ಅಲ್ಲದೆ ವತ್ಸಭಟ್ಟ ಎಂಬ ಕವಿಯು ಕ್ರಿ. ಶ. 473ರಲ್ಲಿ ಬರೆದ ಮಾಂಡಸೂರಿನ ಸೂರ್ಯದೇವಾಲಯದಲ್ಲಿ ಸಿಕ್ಕಿರುವ ಪ್ರಶಸ್ತಿಯಲ್ಲಿ ಕಾಳಿದಾಸನ ಕಾವ್ಯದ ಅನುಕರಣವು ವ್ಯಕ್ತವಾಗಿದೆ. ಆದುದರಿಂದ ಕಾಳಿದಾಸನು ಕ್ರಿ. ಶ. 300ರಿಂದ 473ರ ಮಧ್ಯಕಾಲದಲ್ಲಿದ್ದನೆಂದು ಹೇಳಬೇಕು. ಕ್ರಿ. ಶ. 375ರಿಂದ 413ರ ವರೆಗೆ ಆಳಿದ ಚಂದ್ರಗುಪ್ತ—ವಿಕ್ರಮಾದಿತ್ಯನ ಕಾಲದಲ್ಲಿ ಆಸ್ಥಾನ ಕವಿಯಾಗಿದ್ದನೆಂದರೆ ತಪ್ಪಾಗಲಾರದೆಂದು ವಿದ್ವಾಂಸರ ಅಭಿಪ್ರಾಯ. ಗುಪ್ತರ ರಾಜಧಾನಿಯು ಪಾಟಲಿಪುತ್ರದಿಂದ ಉಜ್ಜಯಿನಿಗೆ ಬದಲಾವಣೆಯಾದುದು ಈ ವಿಕ್ರಮಾದಿತ್ಯನ ಕಾಲದಲ್ಲಿ. ಹೊಸರಾಜಧಾನಿಯನ್ನು ಕಾಳಿದಾಸನು ಅಲ್ಲಲ್ಲಿ ಅತಿಶಯವಾದ ಉತ್ಸಾಹದಿಂದ ವರ್ಣಿಸಿರುವನು. ವಿಕ್ರಮನ ಆಸ್ಥಾನದ ನವಮಣಿಗಳಲ್ಲೊಬ್ಬನೆಂಬ ಇತಿಹಾಸವು ಚರಿತ್ರೆಯ ದೃಷ್ಟಿಯಿಂದ ನಂಬಿಕೆಗೆ ಅರ್ಹವಲ್ಲವಾದರೂ ಅವನ ಕಾವ್ಯಗಳಲ್ಲಿ ಧ್ವನಿತವಾಗುವ ವಿಕ್ರಮ ಕಾಳಿದಾಸರ ವಿಶೇಷ ಸಂಬಂಧವು ಮೇಲ್ಕಂಡ ಊಹೆಗೆ ಸಹಾಯಕವಾಗುವುದು. ವಿಕ್ರಮೋರ್ವಶೀಯ ನಾಟಕದಲ್ಲಿ ಪುರೂರವನಿಗೆ ವಿಕ್ರಮನೆಂಬ ನಾಮಾಂತರವನ್ನೇ ಉಪಯೋಗಿಸಿರುವುದು ತನಗೆ ಆಶ್ರಯಕೊಟ್ಟ ದಣಿಯನ್ನೇ ಉದ್ದೇಶಿಸಿರಬಹುದು. ಕುಮಾರಸಂಭವ ಕಾವ್ಯವು ವಿಕ್ರಮಾದಿತ್ಯನ ಮಗನಾದ ಕುಮಾರಗುಪ್ತನ ಜನನಸ್ಮಾರಕವಾಗಬಾರದೇಕೆ? ಹಾಗೆಯೇ ರಘುವಂಶದ ರಘುವಿನ ದಿಗ್ವಿಜಯವೂ ಮಾಲವಿಕಾಗ್ನಿಮಿತ್ರದ ಅಶ್ವಮೇಧಪ್ರಸಂಗವೂ ವಿಕ್ರಮನ ತಂದೆಯಾದ ಸಮುದ್ರಗುಪ್ತನ ದಿಗ್ವಿಜಯವನ್ನೂ ಅವನು ಮಾಡಿದ ಅಶ್ವಮೇಧಯಾಗವನ್ನೂ ಜ್ಞಾಪಕಕ್ಕೆ ತರುವುದೆಂದರೆ ಅಸಮಂಜಸವಾಗಲಾರದು. ಈ ಪ್ರಕಾರವಾಗಿ ಕಾಳಿದಾಸನು ಸುಮಾರು ಕ್ರಿ. ಶ. 400ರಲ್ಲಿ ಎರಡನೇ ಚಂದ್ರಗುಪ್ತ—ವಿಕ್ರಮಾದಿತ್ಯನ ಆಸ್ಥಾನದಲ್ಲಿ ರಾರಾಜಿಸುತ್ತಿದ್ದನೆಂದು ನಿರ್ಣಯಿಸಬಹುದು.

"ಕಾಳಿದಾಸವಿರಚಿತ" ವೆಂದು ನೂರಾರು ಗ್ರಂಥಗಳಿವೆ. ಯಶಃಕಾಮಿಗಳಾದ ಕವಿಗಳು ತಮ್ಮ ತಮ್ಮ ಪ್ರಬಂಧಗಳ ಕೊನೆಯಲ್ಲಿ ಕಾಳಿದಾಸ

---

*ನಿರ್ಗತಾಸು ನ ವಾ ಕಸ್ಯ ಕಾಲಿದಾಸಸ್ಯ ಸೂಕ್ತಿಷು।
ಪ್ರೀತಿರ್ಮಧುರಸಾರ್ದ್ರಾಸು ಮಞ್ಜರೀಷ್ವಿವ ಜಾಯತೇ॥

ವಿರಚಿತ ಎಂದು ಹೇಳುತ್ತಿದ್ದರು. ಆದರೆ ಶೈಲಿ, ವರ್ಣನೆ ಮುಂತಾದ ಕಾವ್ಯಲಕ್ಷಣಗಳನ್ನು ಪರಿಶೀಲಿಸಿ ಕಾಳಿದಾಸನು ರಘುವಂಶ, ಕುಮಾರ ಸಂಭವ, ಮೇಘದೂತ, ಋತುಸಂಹಾರವೆಂಬ ಕಾವ್ಯಗಳನ್ನೂ, ಮಾಲವಿ ಕಾಗ್ನಿಮಿತ್ರ, ವಿಕ್ರಮೋರ್ವಶೀಯ, ಶಾಕುಂತಲವೆಂಬ ನಾಟಕಗಳನ್ನೂ ರಚಿಸಿದನೆಂದು ನಂಬಿದ್ದೇವೆ.

ಕಾಳಿದಾಸನ ಮಹಿಮೆಯನ್ನು ಪ್ರಾಚೀನರು ವಿಧವಿಧವಾಗಿ ಕೊಂಡಾ ಡಿದ್ದಾರೆ. ಆಧುನಿಕರೂ ಸವಿಮರ್ಶವಾಗಿ ಅವನ ಕಾವ್ಯಕೌಶಲವನ್ನು ಶ್ಲಾಘಿಸಿರುವರು. “ ಉಪಮಾ ಕಾಲಿದಾಸಸ್ಯ ”* ಎಂಬ ಹೊಗಳಿ ಕೆಯು ಲೋಕಪ್ರಸಿದ್ಧವಾಗಿದೆ. ಉಪಮಾಲಂಕಾರಗಳ ಪ್ರಯೋಗದಲ್ಲಿ ಕಾಳಿದಾಸನು ಅಸಮಾನನೆಂದು ಅದರ ಭಾವ. ಆದರೆ ಗುಣಾಂತರಗಳಲ್ಲಿ ಅವನು ಶ್ಲಾಘ್ಯನೆಂದಲ್ಲ. ಕಾಳಿದಾಸನ ಜ್ಞಾನವೂ ಲೋಕಾನುಭವವೂ ವಿಸ್ತಾರವಾದುವು. ನಿರಂತರವೂ ರಾಜಾಶ್ರಯವನ್ನು ಪಡೆದು ಸುಖಿಯಾಗಿ ದ್ದುದರಿಂದ ನಿಖಿಲನಾಗರಿಕ ಸಂಪತ್ತನ್ನು ಹೃದಯಂಗಮವಾಗಿ ಅಲ್ಲಲ್ಲಿ ವರ್ಣಿಸಿರುತ್ತಾನೆ. ಅರಣ್ಯ, ಋಷ್ಯಾಶ್ರಮ, ತಪಶ್ಚರ್ಯೆ ಮುಂತಾದುವು ಗಂಭೀರವಾಗಿಯೂ ವಸ್ತುಸ್ಥಿತಿಗನುಸಾರವಾಗಿಯೂ ಜ್ಞಾನದಾಯಕವಾ ಗಿಯೂ ವಿವರಿಸಲ್ಪಟ್ಟಿವೆ. ಇದಕ್ಕೆ ಮೇಲೆ ಸೂಚಿಸಿದಂತೆ ಕವಿಗಿದ್ದ ದೇಶಪರಿ ಚಯವೇ ಕಾರಣ. ಶೃಂಗಾರಾದಿ ನವರಸಗಳನ್ನು—ಅದರಲ್ಲಿಯೂ ಶೃಂಗಾ ರರಸವನ್ನು—ಪ್ರತಿಪಾದಿಸುವುದರಲ್ಲಿ ಕಾಳಿದಾಸನು ಅದ್ವಿತೀಯನು. ಶೈಲಿಯು ಅತ್ಯುತ್ತಮವಾದ ವೈದರ್ಭೀರೀತಿಯನ್ನನುಸರಿಸಿದೆ. ಕಾಳಿದಾಸನ ಮಹತ್ತ್ವವನ್ನು ವಿದ್ವಾಂಸರು ಇತಿಹಾಸರೂಪದಲ್ಲಿ ಹೀಗೆ ಉದ್ಘೋಷಿ ಸಿದ್ದಾರೆ;—

ಪುರಾ ಕವೀನಾಂ ಗಣನಾಪ್ರಸಙ್ಗೇ
ಕನಿಷ್ಠಿಕಾಧಿಷ್ಠಿತಕಾಲಿದಾಸಾ ।
ಅದ್ಯಾಪಿ ತತ್ತುಲ್ಯಕವೇರಭಾವಾತ್
ಅನಾಮಿಕಾ ಸಾರ್ಥವತೀ ಬಭೂವ ॥

---

*ಉಪಮಾ ಕಾಲಿದಾಸಸ್ಯ, ಭಾರವೇ ರರ್ಥಗೌರವಮ್। ದಣ್ಡಿನಃ ಪದಲಾ ಲಿತ್ಯಂ ಮಾಘೇ ಸನ್ತಿ ತ್ರಯೋಗುಣಾಃ॥—ಈ ಶ್ಲೋಕವು ಮಾಘಕವಿಯ ಪರವಾದ ಸ್ತೋತ್ರವೇ ವಿನಾ ಕಾಳಿದಾಸಪರವಲ್ಲವೆಂಬುದು ಸ್ಪಷ್ಟ. ಪಾಮರರನ್ನು ದೂರ ಮಾಡಿ ಪಂಡಿತರಂಜನೆಯೇ ಕಾವ್ಯದ ಪರಮೋದ್ದೇಶವೆಂದೇರ್ಪಟ್ಟಾಗ ಈ ತಾರತಮ್ಯವು ಉತ್ಪ್ರೇಕ್ಷಿಸಲ್ಪಟ್ಟಿದೆಯೆಂದು ಭಾವಿಸಬಹುದು.

उमामहेश्वरलीला.

मङ्गलम्.

[1] परस्परतपस्संपत्फलायितपरस्परौ ।
प्रपञ्च[2]माता[3]पितरौ प्राञ्चौ जायापती स्तुमः ॥ १ ॥

तथा [4]समक्षं दहता मनोभवं
[5]पिनाकिना भग्नमनोरथा सती ।
[6]निनिन्द रूपं हृदयेन पार्वती[7]
प्रियेषु सौभाग्य[8]फला हि चारुता ॥ २ ॥

[9]इयेष सा कर्तुमवन्ध्य[10]रूपतां
समाधि[11]मा[12]स्थाय तपोभिरात्मनः ।
उवाच[13] माता परिरभ्य वक्षसा
निवारयन्ती महती मुनिव्रतात् ॥ ३ ॥

[14]मनीषितास्सन्ति गृहेषु देवताः
तपः क्व वत्से ! क्व च तावकं[15] वपुः ।
पदं सहेत भ्रमरस्य पेलवं
शिरीष[16]पुष्पं न पुनः पतत्रिणः[17] ॥ ४ ॥

इति ध्रुवेच्छा[18]मनुशासती[19] सुतां
शशाक[20] मेना न नियन्तुमुद्यमात् ।
[12]क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निम्ना[22]भिमुखं प्रतीपयेत्[23] ॥ ५ ॥

अथानुरूपाभि[24]निवेशतोषिणा
कृताभ्यनुज्ञा[25] गुरुणा गरीयसा[26] ।
प्रजासु पश्चात्प्रथितं तदाख्यया
जगाम[27] गौरीशिखरं शिखण्डिमत्[28] ॥ ६ ॥

विमुच्य सा हारमहार्यनिश्चया
बबन्ध बालारुणबभ्रु वल्कलम् ।
यथा प्रसिद्धैर्मधुरं शिरोरुहै-
र्जटाभिरप्येवमभूत्तदाननम् ॥ ७ ॥

न [29]षट्पदश्रेणिभिरेव पङ्कजं [30]
स[31]शैवलासङ्गमपि प्रकाशते ।
प्रति[32]क्षणं सा कृतरोमविक्रियां
व्रताय मौञ्जीं त्रि[33]गुणां बभार[34] ताम् ॥ ८ ॥
कुशाङ्कुरादानपरिक्षताङ्गुलिः
कृतोऽक्षसूत्रप्रणयी तया करः ।
अशेत[35] सा बाहुलतोपधायिनी[36]
निषेदुषी स्थण्डिल[37] एव केवले ॥ ९ ॥
कृताभिषेकां हुतजातवेदसं[38]
त्वगुत्तरासङ्ग[39]वतीमधीतिनीम् ।
[40]दिदृक्षवस्तामृषयोऽभ्युपा[41]गम-
न्न धर्मवृद्धेषु वयस्समीक्ष्यते[42] ॥ १० ॥

इति उमासामान्यतपः.

अथ तद्विशेषतपःप्रयत्नः.

यदा फलं पूर्वतपस्समाधिना
न [43]तावता लभ्यममंस्त[44] काङ्क्षितम् ।
तदानपेक्ष्य[45] स्वशरीरमार्दवं
तपो महत्सा चरितुं प्रच[46]क्रमे ॥ ११ ॥

तद्विशेषतपः.

शुचौ[47] चतुर्णां ज्वलतां हविर्भुजां
[48]शुचिस्मिता मध्यगता सुमध्यमा ।
विजित्य नेत्रप्रतिघातिनीं प्रभा-
मनन्यदृष्टिस्सवितारमैक्षत[49] ॥ १२ ॥
अयाचितोपस्थितमम्बु केवलं
रसात्मकस्योडुपतेश्च[50] रश्मयः ।
बभूव तस्याः किल पारणाविधि-
र्न वृक्षवृत्तिव्यतिरिक्तसाधनः ॥ १३ ॥
शिलाशया सा तु निकेतनाद्बहि-
र्व्यलोकि[51] रात्र्यां तडिदीक्षणैर्घनैः ।
निनाय सात्यन्तहिमोत्किरानिलाः
सहस्य[52] रात्रीरुदवास तत्परा: ॥ १४ ॥

स्वयं विशीर्णद्रुमपर्णवृत्तिता
परा हि [53]काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां
वदन्त्यपर्णेति च तां पुराविदः ॥ १५ ॥

उमातपोमहिमा.

विरोधि[54]सत्त्वोज्झितपूर्वमत्सरं
द्रुमैरभीष्टप्रसवार्चितातिथि ।
नवोटजाभ्यन्तरसंभृतानलं
तपोवनं तच्च बभूव पावनम् ॥ १६ ॥

वटुवेषेणेश्वरप्रवेशः.

अथाजिनाषाढधरः[55] प्रगल्भवा-
ग्ज्वलन्निव ब्रह्ममयेन तेजसा ।
विवेश कश्चिज्जटिलस्तपोवनं
शरीरबद्धः[56] प्रथमाश्रमो यथा ॥ १७ ॥

पार्वतीकृतातिथिसत्कारः.

तमातिथेयी[57] बहुमानपूर्वया
[58]सपर्यया प्रत्युदियाय पार्वती ।
भवन्ति साम्येऽपि निविष्टचेतसां
वपुर्विशेषेष्वतिगौरवाः क्रियाः ॥ १८ ॥

ईशप्रश्नः.

विधिप्रयुक्तां प्रतिगृह्य सत्क्रियां
प्रचक्रमे वक्तुमनुज्झितक्रमः ।
अपि क्रियार्थं सुलभं समित्कुशं[59]
जलान्यपि स्नानविधिक्षमाणि ते ॥ १९ ॥
अपि स्वशक्त्या तपसि प्रवर्तसे
शरीरमाद्यं खलु धर्मसाधनम् ।
अपि त्वदावर्जितवारिसंभृतं
[60]प्रवालमासामनुबन्धि [61]वीरुधाम् ॥ २० ॥
अपि प्रसन्नं हरिणेषु ते मनः
करस्थदर्भप्रणयापहारिषु ।
यदुच्यते [62]पार्वति पापवृत्तये
न रूपमित्यव्यभिचारि तद्वचः ॥ २१ ॥

तथा हि ते शीलमुदारदर्शने
तपस्विनामप्युपदेशितां गतम् ।
अनेन धर्मः सविशेषमद्य मे
[63]त्रिवर्गसारः प्रतिभाति भामिनि ॥ २२ ॥

यतस्सतां सन्नतगात्रि सङ्गतम्
[64]मनीषिभि[65]स्साप्तपदीनमुच्यते ।
अतोऽत्र किञ्चिद्भवतीं बहुक्षमां
अयं जनः प्रष्टु[66]मनास्तपोधने ॥ २३ ॥

कुले प्रसूतिः प्रथमस्य वेधसः
त्रिलोकसौभाग्यमिवोदितं वपुः ।
अमृग्य[67]मैश्वर्यसुखं नवं वयः
तपःफलं स्यात्किमतःपरं वद ॥ २४ ॥

भवत्यनिष्टादपि नाम दुस्सहा-
न्मनस्विनीनां[68] प्रतिपत्ति[69]रीदृशी ।
विचारमार्गप्रहितेन चक्षुषा
न [71]दृश्यते तच्च कृशोदरि त्वयि ॥ २५ ॥

अलभ्यशोकाभिभवेयमाकृति-
र्विभावना [72]सुभ्रु! कुतः पितुर्गृहे ।
पराभिमर्शो न तवास्ति कः करं
[73]प्रसारये[74]त्पन्नगरत्नसूचये ॥ २६ ॥

किमित्यपास्याभरणानि [75]यौवने
धृतं त्वया [76]वार्धकशोभि वल्कलम् ।
वद प्रदोषे [77]स्फुटचन्द्रतारका
विभावरी यद्यरुणाय कल्पते ॥ २७ ॥

दिवं यदि प्रार्थयसे वृथा श्रमः
पितुः प्रदेशाः तव देवभूमयः ।
अथो[78]पयन्तारमलं समाधिना
न रत्नमन्विष्यति [79]मृग्यते हि तत् ॥ २८ ॥

निवेदितं निश्वसितेन सोष्मणा
मनस्तु मे संशयमेव गाहते ।
न दृश्यते प्रार्थयितव्य एव ते
भविष्यति प्रार्थितदुर्लभः कथम् ॥ २९ ॥

अहो स्थिरः कोऽपि तवेप्सितो[80] युवा
चिराय कर्णोत्पलशून्यतां गते ।
उपेक्षते[81] यः श्लथलम्बिनीर्जटाः
कपोलदेशे कलमाग्रपिङ्गलाः[82] ॥ ३० ॥

[83]अवैमि सौभाग्यमदेन वञ्चितं
तव प्रियं यश्चतुरावलोकिनः ।
करोति लक्ष्यं चिरमस्य चक्षुषो
न वक्त्र[84]मात्मीयमराल[85]पक्ष्मणः ॥ ३१ ॥

मुनिव्रतैस्त्वामतिमात्रकर्शितां
दिवाकराप्लुष्टविभूषणास्पदाम् ।
शशाङ्कलेखामिव पश्यतो दिवा
सचेतसः कस्य मनो न दूयते ॥ ३२ ॥

कियच्चिरं श्राम्यसि गौरि विद्यते
ममापि पूर्वाश्रमसञ्चितं तपः ।
तदर्धभागेन लभस्व काङ्क्षितं
वरं तमिच्छामि च साधु वेदितुम् ॥ ३३ ॥

इति प्रविश्याभिहिता द्विजन्मना
मनोगतं सा न शशाक शंसितुम् ।
अथो वयस्यां परिपार्श्ववर्तिनीं
विवर्तितानञ्जननेत्रमैक्षत ॥ ३४ ॥

सखीमुखेन पार्वत्या उत्तरम्.

सखी तदीया तमुवाच वर्णिनं
निबोध साधो तव चेत्कुतूहलम् ।
अरूपहार्यं मदनस्य निग्रहा-
दियं महेशं पतिमाप्तुमिच्छति ॥ ३५ ॥

यदा च तस्याधिगमे जगत्पते-
रपश्यदन्यं न विधिं विचिन्वती ।
तदा सहास्माभिरनुज्ञया पितुः
सखी प्रपन्ना तपसे तपोवनम् ॥ ३६ ॥

पुनरपि महेशप्रश्नः.

अगूढसद्भावमितीङ्गितज्ञया
निवेदितो [86]नैष्ठिकसुन्दरस्तया ।

अयीदमेवं परिहास इत्युमा-
मपृच्छदव्यञ्जितहर्षलक्षणः ॥ ३७ ॥

पार्वत्याः साक्षादुत्तरम्.

अथाग्रहस्ते मुकुलीकृताङ्गुलौ
समर्पयन्ती स्फटिकाक्षमालिकाम् ।
कथञ्चिदद्रेस्तनया मिताक्षरं
चिरव्यवस्थापितवागभाषत ॥ ३८ ॥

यथाश्रुतं वेदविदां वर त्वया
जनोऽयमुच्चैःपदलङ्घनोत्सुकः ।
तपः किलेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न विद्यते ॥ ३९ ॥

ईशोपदेशः.

अथाह [87] वर्णी विदितो महेश्वरः
तदर्थिनी त्वं पुनरेव वर्तसे ।
अमङ्गलाभ्यासरतिं विचिन्त्य तं
तवानुवृत्तिं न च कर्तुमुत्सहे ॥ ४० ॥

शम्भोः कराहिं गजकृत्तिवासः
श्मशानवासं वृषभं च वृद्धम् ।
नग्नं चिताभस्मविलिप्तगात्रं
विचिन्तयंस्तावदुपैमि खेदम् ॥ ४१ ॥

एतद्विवरणम्.

अवस्तुनिर्बन्धपरे कथं नु ते
करोऽयमामुक्तविवाहकौतुकः[88] ।
करेण शम्भोर्वलयीकृताहिना
सहिष्यते तत्प्रथमावलम्बनम् ॥ ४२ ॥

त्वमेव तावत्परिचिन्तय स्वयं
कदाचिदेते यदि योगमर्हतः ।
वधूदुकूलं कलहंसलक्षणं
गजाजिनं शोणितबिन्दुवर्षि च ॥ ४३ ॥

चतुष्कपुष्पप्रकरावकीर्णयोः
परोऽपि को नाम तवानुमन्यते ।

अलक्तकाङ्कानि पदानि पादयो-
र्विकीर्णकेशासु परेतभूमिषु ॥ ४४ ॥

अयुक्तरूपं किमतःपरं वद
त्रिनेत्रवक्षःसुलभं तवापि यत् ।
स्तनद्वयेऽस्मिन्हरिचन्दनास्पदे
पदं चिताभस्मरजः करिष्यति ॥ ४५ ॥

इयं च तेऽन्या पुरतो विडम्बना[89]
यदूढया वारणराज[90]हार्यया ।
विलोक्य [91]वृद्धोक्षमधिष्ठितं त्वया
[92] महाजनः स्मेरमुखो भविष्यति ॥ ४६ ॥

द्वयं गतं सम्प्रति शोचनीयतां
समागमप्रार्थनया [93] कपालिनः ।
कला च सा कान्तिमती [94] कलावत-
स्त्वमस्य लोकस्य च नेत्रकौमुदी ॥ ४७ ॥

वपुर्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं [95] वसु ।
वरेषु यद्बालमृगाक्षि[96] मृग्यते
तदस्ति किं व्यस्तमपि त्रिलोचने[97] ॥ ४८ ॥

[98] निवर्तयास्मादसदीप्सितान्मनः
क्व [99] तद्विधस्त्वं क्व च पुण्यलक्षणा ।
अपेक्षते साधुजनेन वैदिकी
[100] श्मशानशूलस्य न [101] यूपसत्क्रिया ॥ ४९ ॥

उमाकोपः.

इति द्विजातौ [102] प्रतिकूलवादिनि
प्रवेपमानाधरलक्ष्यकोपया ।
[103] विकुञ्चितभ्रूलतमाहिते तया
विलोचने तिर्यगुपान्तलोहिते ॥ ५० ॥

उमाया उत्तरम्.

उवाच चैनं परमार्थतो हरं
न वेत्सि [104] नूनं यत [105] एवमात्थ माम् ।
अलोकसामान्यमचिन्त्यहेतुकं
द्विषन्ति [106] मन्दाश्चरितं महात्मनाम् ॥ ५१ ॥

विपत्प्रतीकारपरेण मङ्गलं
निषेव्यते भूतिसमुत्सुकेन वा ।
जगच्छरण्यस्य निराशिषस्सतः
किमेभिराशोपहतात्मवृत्तिभिः ॥ ५२ ॥

[107] अकिञ्चनः सन्प्रभवः स संपदां
[108] त्रिलोकनाथः [109] पितृसद्मगोचरः ।
सभीमरूपः शिव इत्युदीर्यते
न सन्ति [110] याथात्म्यविदः पिनाकिनः ॥ ५३ ॥

विभूषणोद्भासि [111] पिनद्धभोगि वा
गजाजिनालम्बि दुकूलधारि वा ।
कपालि वा स्यादथ वेन्दुशेखरं
न विश्वमूर्तेरवधार्यते [112] वपुः ॥ ५४ ॥

तदङ्गसंसर्गमवाप्य कल्पते
ध्रुवं चिताभस्मरजो[113] विशुद्धये ।
तथा हि नृत्याभिनयक्रियाच्युतं
विलिप्यते मौलिभिरम्बरौ[114]कसाम् ॥ ५५ ॥

असम्पदस्तस्य वृषेण गच्छतः
प्रभिन्नदिग्वारणवाहनो वृषा ।
करोति पादावुपगम्य मौलिना
विनिद्रमन्दाररजोऽरुणाङ्गुली ॥ ५६ ॥

विवक्षता दोषमपि च्युतात्मना
त्वयैकमीशं प्रति साधु भाषितम् ।
यमामनन्त्यात्मभुवोऽपि कारणं
कथं स लक्ष्यप्रभवो भविष्यति ॥ ५७ ॥

अलं विवादेन यथाश्रुतस्त्वया
तथाविधस्तावदशेषमस्तु सः ।
ममात्र भावैकरसं मनस्स्थितं
न कामवृत्तिर्वचनीयमी[115]क्षते[116] ॥ ५८ ॥

[117]निवार्यतामालि किमप्ययं वटुः
पुनर्वि[118]वक्षुः स्फुरितोत्तराधरः ।
न केवलं यो महतोऽप[119]भाषते
[120] श्रुणोति तस्मादपि यः स पापभाक् ॥ ५९ ॥

121 तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिः
निक्षेपणाय पदमुद्धृतमुद्वहन्ती ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥ ६० ॥

अथ कृष्णकथारहस्यम् .

ಈ ಪದ್ಯಕಾವ್ಯವನ್ನು ರಚಿಸಿದವರು ಶ್ರೀಮಾನ್ ಜಗ್ಗು ಶಿಂಗರಾರ್ಯ ರೆಂಬ ಪಂಡಿತರು. ಇವರು ಮೈಸೂರು ವಿದ್ಯಾಭ್ಯಾಸದ ಇಲಾಖೆಯಲ್ಲಿ ಸಂಸ್ಕೃತ ಅಧ್ಯಾಪಕರಾಗಿದ್ದಾರೆ. ಇವರು ಯದುಶೈಲಚಂಪೂಃ ಎಂಬ ಗ್ರಂಥವನ್ನು ರಚಿಸಿ ಖ್ಯಾತಿ ಪಡೆದಿದ್ದಾರೆ.

ಶ್ರೀಕೃಷ್ಣಚರಿತ್ರೆಯಲ್ಲಿ ಕೆಲವು ಸನ್ನಿವೇಶಗಳನ್ನು ಆರಿಸಿಕೊಂಡು ಪುರಾಣೇತಿಹಾಸಗಳಿಗನುಣವಾಗಿ ಹೊಸ ರೀತಿಯಲ್ಲಿ ಉಪಪಾದನ ಮಾಡುವುದರಮೂಲಕ ಭಗವದ್ವಿಷಯವನ್ನು ಹೃದಯಂಗಮವಾಗಿ ಚಿತ್ರಿಸಿದ್ದಾರೆ. ಮೇಲ್ಕಂಡ ಗ್ರಂಥದಿಂದ ಸುಲಭತರವಾದ ಕೆಲವು ಪದ್ಯಗಳನ್ನು ಪ್ರಕೃತ ಸಂಗ್ರಹಿಸಲಾಗಿದೆ.

अथ कृष्णकथारहस्यम्.

श्रीकृष्णजननम् .

दिव्यायुधानि च तथाद्भुतभूषणानि
  सम्बिभ्रदेव नृवपुः कथमाविरासीः ।
एवं वासुदेव इति सा परताप्युपेत्य
  नूनं समाश्रयदिहापि हरेऽधुना त्वाम् ॥ १ ॥

गोकुलगमनम् .

पित्रोस्समीपमपहाय गतः कुतस्त्वं
  हे कृष्ण ! गोकुलमहो ! शिशुभाव एव ।
बाल्येऽहनं सुररिपून्रघुनायकोऽहं
  पित्रोः परोक्षमिति तद्वदिहोद्यतोऽसि ॥ २ ॥

पूतनाहननम् .

स्तन्यं प्रदातुमबलां समुपागतां प्राक्
  क्षीरं पिबन्समवधीः यदुनाथ कस्मात् ।
आदौ निहत्य वनितां रघुनायकोऽहं
  प्राप्तं सदा विजयमित्यधुनाप्यहान्किम् ॥ ३ ॥

स्तने न्यस्य मुखं कृष्ण ! त्वं कथं पूतनामहन् ।
नखेन हतशत्रोस्ते मुखेनारिवधः क्षमः ॥ ४ ॥

शकटासुरभञ्जनम् .

चूर्णीचकर्थ शकटं निकटं गतं त्वं
  डिम्भत्व एव बत ! दुस्सहचेष्टितोऽसि ।
श्रीनाथ ! [1]पत्त्ररथनाथरथाय मह्यं
  एतन्न रोचत इति [2]व्यभिनः किमेवम् ॥ ५ ॥

बलीन्द्रनिग्रहः.

बलिनृपतिमिवान्यं भक्तवर्गं पुरेव
  क्वचिदपि नय मा भोः ! पाद ! पाताललोकम् ।
इति किमु वदसि त्वं पूर्वकृत्येऽनु[3]तापा-
  च्छरणमुपगतानां रक्षणापेक्ष ! शौरे[4] ! ॥ ६ ॥

पुरेव लोकाक्रमणे यदि स्या-
  दाशा तवाङ्घ्रे वदने मदीये ।

सन्दर्शयाम्यत्र विनान्ययाज्ञां
क्रमस्व लोकानिति किं ब्रवीषि ॥ ७ ॥
लालाजलासारपरंपराभिः
पदाम्बुजं वृष्णिकुलेन्द्र सिञ्चन् ।
वसुन्धरायामपि कामपि त्वं
गङ्गानदीं स्रष्टुमिहोद्यतोऽसि ॥ ८ ॥

दामोदरलीला:

बद्धानां जगतां स्थलं त्विह कृतं कुक्ष्यन्तरे श्रीपते
मुक्तिस्थानमिदं पदाम्बुजमिति प्रख्यापयन्ती नृणाम् ।
माता ते सुतवत्सलापि पदयोर्बन्धं विनैवासक्र-
त्वच्चेष्टासु बबन्ध हन्त सुदृढं [5]दाम्नोदरं कोमलम् ॥ ९ ॥
अस्यैव नाभौ कमलं सनालं
पुरोद्भूदद्य यदि प्ररोहेत् ।
पीडा भवेदित्युदरं किमेषा
चेष्टोपरो[6]धच्छलतो बबन्ध ॥ १० ॥
तनुवलग्नजुषा शिशुनोदरे
कथमहो ध्रियतेऽखिलविष्टपम् ।
इति भयाकुलया तु यशोदया
जठरबन्धनमाचरितं ध्रुवम् ॥ ११ ॥

यमलार्जुनभञ्जनम् .

सुग्रीवविस्रम्भकृते रमेश !
न्यपातयः त्वं किल सप्तसालान् ।
अद्यापि तद्वासनयैव साल-
युग्मं व्यभाङ्क्षीश्शिशुलीलयैव ॥१२ ॥
त्वमर्जुनं रक्षितुमेव काङ्क्ष-
न्यदाभवस्तत्परिभञ्जनेच्छुः ।
तदा पुराणं भृगुनन्दनत्वं[7]
त्वय्याविरासीदिति निश्चिनोमि ॥ १३ ॥

मृद्भक्षणलीला.

क्षेतुर्हि मृत्स्नां मुखतो मुरारे !
लीलां तवैतामवलोक्य माता ।

निवारयामास मुहुर्वृथा सा
  न वेद नूनं किटि[8]चेष्टितं त्वाम् ॥ १४ ॥

पयःपानलीला.

नाभौ निगूढः[9] कमलाङ्कुरो मे
  पुनर्जगत्सृष्टिविहारकाले ।
सम्यक्प्ररोहत्विति वाधुनैव
  पयः पिबन्सिञ्चसि किं स्वकुक्षौ ॥ १५

अथवात्ममुखेऽभिदर्शितानां
  निखिलानां जगतां च पोषणाय ।
बहुधा परिभर्त्सितोऽपि गोपैः
  पिबसि त्वं प्रतिमन्दिरं च दुग्धम् ॥ १६ ॥

कालीयमर्दनलीला.

दृष्ट्वा ह्रदे फणिनमाशु निपत्य तस्य
  भोगावृतस्सुनिभृतश्च निमीलिताक्षः ।
मध्येऽब्धि भोगिनि कृतां निजयोगनिद्रां
  स्पष्टीचकर्थ सुहृदस्तव [10] बिभ्युरज्ञाः ॥ १७ ॥
[11]कालीयमर्दनविधौ तव कोपहेतु-
  र्ज्ञातः पुरा पुरहरस्य शरो यदाभूः ।
मौर्वीकृतेन भुजगेन तदा सुदूरं
  [12]निष्कासितोऽहमिति तं [13]तुदसीह शौरे ! ॥ १८ ॥
अथवेन्द्रजिता प्रयुक्तमस्त्रं
  भुजगो रामतनोः प्रकल्प्य मूर्छाम् ।
मम शौर्ययशो जहार हन्ते-
  त्यतिरोषात्तुदसीह तं भुजङ्गम् ॥ १९ ॥

गोवर्धनोद्धारः.

देवेन्द्रे कुपितेऽथ वर्षति तथा लोकेऽपि शोकाकुले
  सर्वज्ञोप्यविदन्नुपायमपरं श्रान्ति विना लीलया ।
यद्गोवर्धनपर्वतं समवहस्तत्रास्ति शौरे ! महानभ्यास-
  स्तव मन्दरक्षितिधरं धृत्वा समासादितः ॥ २० ॥

गोरक्षणम् .

गोपालनं बहुमतं विपिनान्तरेषु
  युक्तं किमार्य ! तव सर्वजगन्नियन्तुः ।

अस्यावताराविभवस्य [14]निदानमासी-
द्वारूपमेव धरणेरिति किं प्रियास्ताः ॥ २१ ॥

वेणुगानलीला.

किमर्थं कान्तारे यदुकुलमणे पर्यटसि वा
कुतस्तस्मिन्वेणुं मधुरमधुरं वा ध[15]यसि च ।
पुरा मां रामत्वे हरिणहतकोऽवञ्चयदिति
प्रतार्यैतान्हन्तुं विपिनभुवि नूनं प्रयतसे ॥ २२ ॥

कुवलयापीडसंहारः.

नूनं कुवलयापीडं करीन्द्रं हन्तुमुद्यतः ।
अद्यापि सिंहगन्धं[16] त्वं न मुञ्चसि चिरन्तनम् ॥ २३ ॥

खाण्डवदहनम् .

प्रीतिः परा तव कुतो यदुनाथ वह्नौ
यत्खाण्डवाशितुरमुष्य चकर्थ साह्यम् ।
अत्रास्ति हेतुरथवा तव राघवत्वे
पत्नीं ररक्ष स किलात्मशिखां प्रविष्टाम् ॥ २४ ॥

भूरिश्रवोवधः.

युद्धं सात्यकिना समं विरचयन्भूरिश्रवा दूरतः
कौन्तेयेन[17] तवोपदेशवचसां [18]निघ्नेन सन्ताडितः ।
धर्मोऽयं किमु कृष्ण! ते रघुपतिस्त्वं वालियुद्धे कृतां
रीतिं बोधयसीह वाश्रितजनांस्त्रातुर्न ते भीरधात्[19] ॥ २५ ॥

कर्णाश्वत्थाम प्रसङ्गः.

ಈ ಅಂಕವನ್ನು ಭಟ್ಟನಾರಾಯಣ ಕವಿ ರಚಿಸಿದ ವೇಣೀಸಂಹಾರ ವೆಂಬ ನಾಟಕದಿಂದ ಸಂಗ್ರಹಿಸಿದೆ. ಕವಿಯು ಕಾನ್ಯಕುಬ್ಜದ ಬ್ರಾಹ್ಮಣ ನೆಂದೂ ಕ್ರಿ.ಶ. ಎಂಟನೇ ಶತಮಾನದಲ್ಲಿ ಭೂಮಿಯನ್ನಲಂಕರಿಸಿದ್ದನೆಂದೂ ವಿದ್ವಾಂಸರು ಅಭಿಪ್ರಾಯಪಡುತ್ತಾರೆ. ಈ ಕವಿಗೆ "ಮೃಗರಾಜ" ಎಂಬ ಅಡ್ಡ ಹೆಸರು ಇತ್ತೆಂದು ನಾಟಕದ ಪೀಠಿಕೆಯಿಂದ ಗೊತ್ತಾಗುತ್ತದೆ. ನಾಟಕ ಲಕ್ಷಣಗಳನ್ನು ಹೇರಳವಾಗಿ ಉದಾಹರಿಸಿಕೊಡುವ ಗ್ರಂಥಗಳಲ್ಲಿ ಈ ವೇಣೀಸಂಹಾರವೂ ಒಂದಾಗಿರುವುದರಿಂದ ಇದು ಬಹುಕಾಲದಿಂದಲೂ ಪಂಡಿತರಿಗೆ ಪ್ರಿಯವಾದ ನಾಟಕವಾಗಿದೆ.

ಕೃಷ್ಣಸಂಧಾನದಿಂದ ದುರ್ಯೋಧನನ ಸಂಹಾರದವರೆಗೆ ಮಹಾ ಭಾರತ ಕಥೆಯು ಈ ನಾಟಕದ ವಿಷಯ. ಕಥೆಯು ವಿಸ್ತರವಾದರೂ ಅದನ್ನು ರಸವತ್ತಾಗಿ ರಚಿಸಿ ಪಾತ್ರಗಳು ತೇಜೋಮಯವಾಗಿರುವಂತೆ ಚಿತ್ರಿಸಿ ಕವಿಯು ತನ್ನ ಪ್ರತಿಭೆಯನ್ನೂ ಕೌಶಲವನ್ನೂ ತೋರಿಸಿದ್ದಾನೆ. ಇಲ್ಲಿ ಮುಖ್ಯವಾಗಿ ಪ್ರತಿಪಾದಿಸಲ್ಪಟ್ಟಿರುವುದು ವೀರರಸ. ಮೂರನೆಯ ಅಂಕದಲ್ಲಿ ಬರುವ ಕರ್ಣಾಶ್ವತ್ಥಾಮರ ಪ್ರಸಂಗವು ಚಿತ್ತಾಕರ್ಷಕವಾಗಿದೆ. ತಂದೆಯಾದ ದ್ರೋಣಾಚಾರ್ಯರನ್ನು ಕಳೆದುಕೊಂಡ ಅಶ್ವತ್ಥಾಮನು ರೋಷಾವಿಷ್ಟನಾಗಿ ಪಾಂಡವರನ್ನು ಧ್ವಂಸಮಾಡಬೇಕೆಂದು ನಿಶ್ಚಯಿಸಿ ಅದಕ್ಕಾಗಿ ಕೌರವ ಸೇನಾಧಿಪತ್ಯವನ್ನು ಕೊಡೆಂದು ದುರ್ಯೋಧನನನ್ನು ಕೇಳುತ್ತಾನೆ. ಆದರೆ ಅವನು ಅದನ್ನು ಆಗಲೇ ಕರ್ಣನಿಗೆ ವಾಗ್ದಾನ ಮಾಡಿರುತ್ತಾನೆ. ಅಶ್ವತ್ಥಾಮನು ಹತಾಶನಾಗಿ ಖೇದಪಡುತ್ತಿರಲು ಕರ್ಣನು ತನ್ನ ಗೌರವದ ಮದದಿಂದ ಅವನನ್ನು ಕೆಣಕುತ್ತಾನೆ. ಇಬ್ಬ ರಿಗೂ ಕಲಹವುಂಟಾಗಿ ಅಶ್ವತ್ಥಾಮನು ಕೋಪದಿಂದ ಕರ್ಣ ಸಾಯುವವರೆಗೂ ಧನುಸ್ಸನ್ನು ಹಿಡಿಯುವುದಿಲ್ಲವೆಂದು ಹೇಳಿ ಶಸ್ತ್ರಸಂನ್ಯಾಸಮಾಡುವನು. ಅಷ್ಟು ಹೊತ್ತಿಗೆ ಸರಿಯಾಗಿ ದುಶ್ಶಾಸನನು ಭೀಮನ ಕೈಗೆ ಸಿಕ್ಕಿ ಹತನಾಗು ವುದರಲ್ಲಿದ್ದಾನೆ. ಕರ್ಣ ದುರ್ಯೋಧನರು ಅವನ ರಕ್ಷಣೆಗಾಗಿ ನುಗ್ಗುತ್ತಾರೆ. ಶೌರ್ಯವನ್ನು ತೋರಿಸಬಹುದಾದ ಇಂಥ ಅವಕಾಶ ಹೋಯಿತಲ್ಲಾ ಎಂದು ಅಶ್ವತ್ಥಾಮನು ಮರುಗುತ್ತಾನೆ. ಪರಸ್ಪರ ಏನೇ ಜಗಳವಿದ್ದರೂ ಕರ್ಣಾ ಶ್ವತ್ಥಾಮರಿಬ್ಬರೂ ದುರ್ಯೋಧನನ ಸೇವೆಯಲ್ಲಿ ಆದರಾತಿಶಯವನ್ನು ತೋ ರಿಸುವುದು ಶ್ಲಾಘ್ಯವಾಗಿದೆ.

अथ वेणिसंहारे

कर्णाश्वत्थामवैमनस्यम्.

(ततः प्रविशति [1] आकृष्टखड्गः कलकलमाकर्णयन्नश्वत्थामा[2])

अश्वत्थामा—अद्य [3] समरावनेरभूतपूर्वः श्रवणभैरवो रवः कुतः सञ्जातः ? (विचिन्त्य) ध्रुवं [4] गाण्डीविना सात्यकिना [5] वृकोदरेण वा यौवनदर्पादतिक्रान्तमर्यादेन परिकोपितस्तातः। यतः स समुल्लङ्घ्य शिष्यप्रियतां आत्मप्रभावसदृशमाचेष्टते। दुर्योधन-पक्षपाती परशुरामाल्लब्धास्त्रो लोके सर्वधनुष्मतामधिपतिस्स [6] रिपुघस्मरं कर्म प्रारब्धवान्। (पृष्ठतो विलोक्य) तत्कोऽत्र भोः [7] साङ्ग्रामिकं मे रथमुपनय। अथवालमिदानीं रथ[8]प्रतीक्षयानया। नीलजलधरभासुरेण [9] विमलकलधौतत्सरुणा खड्गेन सशस्त्र एवास्मि। यावत्समरभुवमवतरामि। (परिक्रम्य वामाक्षिस्पन्दं[10] सूचयित्वा) अये ! ममापि नामाश्वत्थाम्नः तातविक्रमदर्शनलालसस्यानिमित्तानि समरगमनविघ्नमुत्पादयन्ति। भवतु। गच्छामि। [11](सावष्टम्भं परिक्रम्या-प्रतो विलोक्य) कथं ! [12] अवधीरितक्षात्रधर्माणां अगणितकुलयशसां रणभूमेस्समन्तादपक्रामतां चतुरङ्गबलानामयं महान्नादः। धिक्कष्टम्। [13] महारथाः कर्णादयोऽपि समरात्पराङ्मुखा धावन्ति। [14] ताताधिष्ठि-तस्यापि बलस्येयमवस्था। भवतु। [15] संस्थम्भयामि। भोः भोः ! कौरवसेनासंरक्षका नरपतयः ! अलमलं समरपरित्यागसाहसेन।

यदि समरमपास्य नास्ति मृत्यो-
भयमिति युक्तमितोऽन्यतः प्रयातुम्।
अथ मरणमवश्यमेव जन्तोः
किमिति मुधा मलिनं यशः कुरुध्वे ॥ १ ॥

अस्त्रज्वालावलीढप्रतिबलजलधेरन्तरौर्वायमाणे
सेनानाथे स्थितेऽस्मिन्मम पितरि गुरौ सर्वधन्वीश्वराणाम् ।
कर्णालं संभ्रमेण व्रज कृप समरं मुञ्च हार्दिक्यशङ्कां
ताते चापद्वितीये वहति रणधुरं को भयस्यावकाशः ॥ २ ॥

(नेपथ्ये)

कुतोऽद्यापि ते तात?

अश्वत्थामा—आः! क्षुद्राः भीरवः! कथं न दीर्णं सहस्रधा पापं कथयतां वोऽनया जिह्वया ।

(प्रविश्य पटाक्षेपेण संभ्रान्तः सप्रहारः)

परित्रायतां परित्रायतां कुमारः (इति पादयोः पतति)

अश्वत्थामा—अश्वसेन! त्रैलोक्यपरित्राणक्षमस्य ननु सारथिरसि ।

सूतः—(सकरुणम्) कुतोऽद्यापि ते तातः!

अश्वत्थामा—किं तातो नामाऽस्तमुपगतः?

सूतः—अथकिम् ।

अश्वत्थामा—'हा तात!' (इति मोहमुपगतः)

सूतः—कुमार! समाश्वसिहि । समाश्वसिहि ।

अश्वत्थाम—हा तात! हा सुतवत्सल! हा लोकत्रयैकधनुर्धर! जामदग्न्यप्रियशिष्य! क्वासि? प्रयच्छ मे प्रतिवचनम् ।

सूतः—कुमार! अलं शोकावेगेन । वीरस्वर्गं [16] आरूढवति पितरि, त्वमपि शोकसागरं वीर्येणैवोत्तर ।

अश्वत्थामा—(अश्रूणि विमुच्य) आर्य! कथय । कथय । कथं तादृशभुजवीर्यसागरस्तातोऽपि नामाऽस्तमुपगतः? अन्तेवासिदयालुस्तातः भीमादर्जुनाद्वा उत वासुदेवाद्वा किमासादितः? एभ्यश्चतुर्थादापदमस्याहं न शङ्के ।

सूतः—एतेऽपि कुपितस्य तस्य [17] सङ्ख्ये तुलां[18] नोपयान्ति । शुचा परीतेन तु तेन यदा शस्त्रं परित्यक्तं तदा दृष्टद्युम्नेनायमासादितः । तच्छोकस्य

कुमार एव ननु कारणम्। अश्वत्थामा हत इत्युक्त्वा स्वैरं गज इति व्याहृतवान् धर्मसूनुः। तच्छ्रुत्वा दयिततनयोऽसौ अस्राणि नयन-सलिलेन सार्धं मुमोच।

अश्वत्थामा—हा तात! हा सुतवत्सल! हा युधिष्ठिरपक्षपातिन्! हा शिष्य-प्रिय! (इति रोदिति)

सूतः—कुमार! अलमलं अत्यन्त[19]परिदेवनेन।

अश्वत्थामा—तात! सुतवत्सलो भवान्मृषा मम वधं श्रुत्वामृयथाः। भवता विनाप्यहं जीवामि। क्रूरेऽपि मयि तव पक्षपातो मुधा। (इति मोहमुपगतः)

सूतः—समाश्वसितु समाश्वसितु कुमारः।

(ततः प्रविशति कृपः)

कृपः—(सोद्वेगं निःश्वस्य) कुरुपतिं धिक्। अजातशत्रुं धिक्। विफलशस्त्र-भृतोऽस्मान् धिक्। भूपतीन् धिक्। ये तदा द्रुपदात्मजायाः अधुना द्रोणस्य च केशग्रहं लिखिता इव वीक्षितवन्तः। (विलोक्य) तदयं वत्सस्तिष्ठति। यावदुप[20]सर्पामि। (उपसृत्य ससंभ्रमं) वत्स! समा-श्वसिहि। समाश्वसिहि।

अश्वत्थामा—(संज्ञां लब्ध्वा, सास्रम्) हा तात! हा सकलभुवनैकगुरो! (आकाशे) युधिष्ठिर! युधिष्ठिर! आजन्म त्वं वितथं नोक्तवान्। त्वं कमपि न द्वेक्षि। अतस्त्वमजातशत्रुः[21]। ताते गुरौ द्विजवरे मम भाग्यदोषात्तत्सर्वमेकपदे त्वया निरस्तम्[22]।

सूतः—एष ते मातुलश्शारद्वतः पार्श्वे तिष्ठति।

अश्वत्थामा—(पार्श्वे विलोक्य साबाष्पम्) मातुल! सेनापतिना येन रणभुवं त्वमगमः, य एकश्शूराणां समरगुरु[23]कण्डू[24]निकषणः, यस्ते [25]स्वसुः श्लाघ्यो भर्ता, स क नु गतः?

कृपः—सर्वमपि त्वं वेत्सि। तदलमत्यन्तशोकावेगेन।

अश्वत्थामा—मातुल ! परित्यक्तमेव मया परिदेवितम्[26] । एषोऽहं सुतवत्सलं तातमेवानुगच्छामि ।

कृपः—वत्स ! ईदृशं [8] व्यवसितमनुपपन्नं भवद्विधानाम् ।

अश्वत्थामा—आर्य शारद्वत !

मद्वियोगभयात्तातः परलोकमितो गतः ।
करोम्यविरहं तस्य वत्सलस्य सदा पितुः ॥ ३ ॥

कृपः—वत्स ! यावदयं संसारस्तावत्प्रसिद्धैवेयं लोकयात्रा यत्पुत्रैः पितरः लोकद्वयेऽप्यनुवर्तनीया इति । पश्य—[28]निवापाञ्जलिदानेन श्राद्ध-कर्मभिः किं जीवंस्त्वं तस्योपकारे शक्तः ? उत अन्यथा ?

अश्वत्थामा—आर्य ! सत्यमेवेदम् । किन्त्वतिदुर्वहत्वाच्छोकभारस्य न शक्नोमि तातविरहितः [29] प्रणान्धारयितुं क्षणमपि । तद्गच्छामि तमेवोद्देशं[30] यत्र तथाविधमपि पितरं द्रक्ष्यामि । कृतमद्यापि शस्त्रग्रहाविडम्बनया । भगवन् शस्त्र !

गृहीतं येनासीः परिभव[31]भयान्नोचितमपि
प्रभावाद्यस्याभून्न खलु तव कश्चिन्न विषयः ।
परित्यक्तं तेन त्वमसि सुतशोकान्न तु भया-
द्विमोक्ष्ये[32] शस्त्र त्वामहमपि यतः स्वस्ति[33] भवते ॥ ४ ॥

(नेपथ्ये)

भोः भोः ! राजानः ! कथमिह भवन्तः सर्वे गुरोर्भारद्वाजस्य परिभव-ममुना [34] नृशंसेन प्रयुक्तं उपेक्षन्ते ।

अश्वत्थामा—(आकर्ण्य, शनैः शनैः शस्त्रं स्पृशन्) किं गुरो[35]र्भारद्वाजस्य परि-भवः ?

(पुनर्नेपथ्ये [36])

त्रिभुवनगुरोः द्रोणस्य नयनयोः सलिलं सिञ्चतः [37]पलितधवले मौलौ पाणिं न्यस्य कृत्वा नृशंसं कर्म स्वशिबिरं[38] धृष्टद्युम्नः प्रयाति सर्वे सहध्वम् ।

अश्वत्थामा—(सक्रोधं सकम्पं च कृपसूतौ दृष्ट्वा) किं नामेदम्? अशस्त्रपाणेस्तातस्य पलितधवले मौलौ किं शस्त्रं व्यापारितवान्?

कृपः—वत्स! एवं किल जनः [39]कथयति।

अश्वत्थामा—किं तातस्य दुरात्मना [40]परिमृष्टमभूच्छिरः। हा तात! हा प्रियसुत! मन्दभाग्यस्य मम कृते शस्त्रपरित्यागात्तथाविधेन क्षुद्रेणात्मा [41]परिभावितः अथवा शोकादाजौ [42]तनुं त्यक्तवतः शिरः श्वा वा काको वा द्रुपदतनयो वा परिमृशतु! रिपोश्शिरसि मम वामः पादो निहितः। न करः। दुरात्मन्! पाञ्चालापसद! तातं मुक्तशस्त्रं निश्चित्य शङ्कां त्यक्त्वा अस्योत्तमाङ्गे[43] पाणिं [44]विदधत्त्वं मां अश्वत्थामानं करधृतधन्वानं पाण्डुपाञ्चालसेनातूलोत्क्षेपप्रलयपवनं किं व्यस्मरः? युधिष्ठिर,[45] अजातशत्रो, धर्मपुत्र, अमिथ्यावादिन्! सानुजस्य ते किमनेनाप्रकृतम्? किमनेन जिह्मचेतसा? अर्जुन! सात्यके! बाहुशालिन् वृकोदर! माधव! युक्तं नाम भवतां, लोकैकधनुर्धरस्य द्विजन्मनः परिणतवयसः सर्वाचार्यस्य विशेषतो मम पितुः मनुजपशुनामुना स्पृश्यमानं उत्तमाङ्गमुपेक्षितुम्? अथवा सर्व एवैते पातकिनः—

कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः।
नरकरिपुणा[46] सार्धं तेषां सभीमकिरीटिना-
मयमहमसृ[47]ङ्मेदोमांसैः करोमि दिशां बलिम्॥ ५॥

कृपः—किं न संभाव्यते भारद्वाजतुल्ये बाहुशालिनि त्वयि।

अश्वत्थामा—रे रे! पाण्डवमत्स्यसोमकमागधेयाः, क्षत्रियापसदाः! पितुर्मूर्ध्नि स्पृष्टे, ज्वलदनलभास्वत्परशुना रामेण यत्कृतं तदेव कर्तुं रणमुखे क्रोधान्धोऽश्वत्थामा किं न [48]प्रभवति? सूत! गच्छ त्वम्। सर्वोपकरणैस्सिद्धं साङ्ग्रामिकैस्सर्वैरप्यायुधैरुपेतं महाहवलक्षणं नामास्मत्स्यन्दनं[49] उपनय।

सूतः—यदाज्ञापयति कुमारः । (इति निष्क्रान्तः)

कृपः—वत्स! अवश्यप्रति[50]कर्तव्येऽस्मिन्दारुणे निकाराग्नौ सर्वेषामस्माकं कोऽन्यस्त्वामन्तरेण शक्यः प्रातिविधातुम्[51] । अपि तु सैनापत्येऽभिषिक्तं अत्रभवन्तमिच्छामि समरभुवमवतारायितुम् ।

अश्वत्थामा—परतन्त्रमिदमकिंचित्करं च ।

कृपः—वत्स! पश्य । न तथा—

भवेदभीष्ममद्रोणं धार्तराष्ट्र[52]बलं कथम् ।
यदि तत्तुल्यकक्ष्योऽत्र भवान्धुरि न युज्यते ॥ ६ ॥

कृतपरिकरस्य भवादृशस्य त्रैलोक्यमपि परिपन्थीभ[53]वितुं न शक्तम् । किं पुनर्यौधिष्ठिरं बलम् । तदेवं मन्ये 'परिकल्पिताभिषेकोपकरणः कौरवराजस्त्वामेव चिरा[54]दभ्यपेक्षमाणस्तिष्ठतीति' ।

अश्वत्थामा—यद्येवं त्वरते मे परिभवा[55]नलदह्यमानं चेतः [56]प्रतीकारजलावगाहनाय । तदहं तातवधविषण्णमानसं कुरुपतिं सैनापत्य[57]स्वयंग्रहणप्रणयसमाश्वासनया मन्दसन्तापं करोमि ।

कृपः—वत्स! एवमिदम् । अतस्तमेवोद्देशं गच्छावः ।

(इति परिक्रामतः)

(ततः प्रविशतः कर्णदुर्योधनौ)

दुर्योधनः—अङ्गराज! तेजस्वी रिपुणा हतस्य बन्धोः दुःखं धृतायुधाभ्यां बाहुभ्यां त्यजति । आचार्यः संख्ये सुतनिधनं निशम्य विशस्त्र आसीत् । प्रकृतिर्दुस्त्यजेति सूक्तमभियुक्तैः । यतश्शोकान्धस्सः दैन्यपरिग्रहं द्विजन्मधर्मसुलभं कृतवान् ।

कर्णः—राजन्न खल्विदमेवम् । एवं किलास्याभिप्रायः 'यथाश्वत्थामा मया पृथिवीराज्येऽभिषेक्तव्य इति' । तस्याभावाद्वृद्धस्य ब्राह्मणस्य वृथा शस्त्रग्रह इति तथा कृतवान् ।

दुर्योधनः—(सशिरःकम्पं) एवमिदम् ।

कर्णः—एतदर्थं कौरवपाण्डवपक्षपातेन प्रवृत्तस्य [58]राजकस्य संग्रामे प्रधानपुरुषवध उपेक्षा[59] कृता ।

दुर्योधनः—उपपन्नमिदम् ।

कर्णः—अन्यच्च राजन्—द्रुपदेनास्य बाल्यात्प्रभृत्यभिप्रायवेदिना न स्वराष्ट्रे वासो दत्तः ।

दुर्योधनः—साधु अङ्गराज! साधु । निपुणमभिहितम् ।

कर्णः—न च ममायमेकस्याभिप्रायः । अन्येप्यभियुक्ता नैवेदमन्यथा मन्यन्ते

दुर्योधनः—एवमेवैतत् । कः सन्देहः?

दत्वाऽभयं सोऽतिरथो[60] वध्यमानं किरीटिना ॥
सिन्धुराजमुपेक्षेत नैवं चेत्कथमन्यथा ॥ ७ ॥

कृपः—(विलोक्य) वत्स! एष दुर्योधनः सूतपुत्रेण सह अस्यां न्यग्रोध[61]-च्छायायां उपविष्टः । तदुपसर्पावः । उभौ (तथा कृत्वा) विजयतां[62] कौरवेश्वरः ।

दुर्योधनः—अये! कृपोऽश्वत्थामा च । (आसनादवतीर्य) कृपं प्रति, गुरोऽ-भिवादये । (अश्वत्थामानमुद्दिश्य) क्रान्तैरिमैरङ्गैः परिष्वजस्व माम् । (इत्यालिङ्गय पार्श्वे उपवेशयति)

अश्वत्थामा—बाष्पमुत्सृजति ।

कर्णः—द्रौणायने! अलमलमत्यर्थमात्मानं शोकानले प्रक्षेप्तुम् ।

दुर्योधनः—आचार्यपुत्र! को विशेष आवयोरस्मिन्व्यसनमहार्णवे । द्रोणः प्रणयवांस्तातस्तव । स मे पितुस्सखा । स आवयोश्शस्त्रे गुरुः । मम दुःखं गुरुशुचा मनसा त्वमेव जानीहि ।

अश्वत्थामा—राजन्नेवं पक्षपातिनि त्वयि युक्तमेव शोकभारं लघूकर्तुम् । किन्तु! मयि जीवति तातः केशग्रहमवाप्तवानिति मे महद्दुखम् । ।

कर्णः—किमत्र क्रियते? यदा तेनैव शस्त्रमुत्सृजता तादृशीमवस्थामात्मा नीतः ।

अश्वत्थामा—श्रूयतां यत्क्रियते—

यो यः शस्त्रं बिभर्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यागतो वा ।
यो यः तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः[63]
क्रोधान्धस्तस्य तस्य स्वयमपि जगतामन्तकस्यान्तकोऽहम् ॥

दुर्योधनः—अनन्यसाधारणवीरभावस्य किमन्यत्सदृशम् ?

कृपः—सुमहान्समरभरः द्रोणपुत्रेण वोढुमध्यवसितः भवता कृतपरीकरोऽयं लोकत्रयमप्युच्छेत्तुं[64] समर्थः । किंपुनर्यौधिष्ठिरं बलम् ? अतोऽयमभिषिच्यतां सैनापत्ये ।

दुर्योधनः—सुष्ठु युष्माभिरभिहितम् । किन्तु प्राक्प्रतिपन्नोऽयमर्थोऽङ्गराजस्य[65]

कृपः—अङ्गराजस्य कृते एनमुपेक्षितुं न युक्तम् । अस्यापि तदेवारिकुलमनुशासनीयम् ।

अश्वत्थामा— किमद्यापि युक्तायुक्तविचारणया ?

प्रयत्नपरिबोधितस्तुतिभिरद्य शेषे निशां
अकेशवमपाण्डवं भुवनमद्य निस्सोमकम्[66] ।
इयं परिसमाप्यते रणकथाद्य दोश्शालिनां
अपैतु नृपकाननातिगुरुरद्य भारोभुवः ॥ ९ ॥

कर्णः—वक्तुं सुकरमिदम् । दुष्करं पुनरध्यवसितुम् । बहवः कौरवबलेऽस्य कर्मणः शक्ताः ।

अश्वत्थामा—अङ्गराज ! एवमिदम् । दुःखेनाहमेवं ब्रवीमि । न पुनर्वीरजनाधिक्षेपेण ।

कर्णः—दुःखितस्याश्रुपातः कुपितस्य संग्रामावतरणमुचितम् । नैवंविधाः प्रलापाः ।

अश्वत्थामा—(सक्रोधम्) अरे रे ! सूतापसद ! ममापि दुःखितस्याश्रुभिः प्रतिक्रियां निर्दिशसि । न शस्त्रेण ।

निर्वीर्यं गुरुशापभाषितवशात्किं मे तवेवायुधं
सम्प्रत्येव भयाद्विहाय समरं प्राप्तोऽस्मि किन्त्वं यथा ।
जातोऽहं स्तुतिवंशकीर्तनविदां किं सारथीनां कुले
[67]क्षुद्रारातिकृताप्रियं प्रतिकरोम्यस्त्रेण नास्त्रेण यत् ॥ १० ॥

कर्णः—अरे रे ! [68]वाचाट ! वृथाशस्त्रग्रहणदुर्विदग्ध[69] !

निर्वीर्यं वा सवीर्यं वा मया न त्यक्तमायुधम् ।
यथा पाञ्चालभीतेन पित्रा ते बाहुशालिना ॥ ११ ॥

सूतो वा सूतपुत्रो वा यो वास्यो[70] वा भवाम्यहम् ।
दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम् ॥ १२ ॥

अश्वत्थामा—अरे, रे, रथकारकुलकलङ्क, राधागर्भभारभूत, आयुधानभिज्ञ ! प्रथितभुजसारस्स भीरुश्शूरो वा प्रतिदिनं तेनाजौ यत्कृतं तदियं वसुधा वेत्ति । शस्त्रं तेन कुतः परित्यक्तमित्यत्र पृथासूनुस्साक्षी । रणभीरो ! तदा त्वं कासीः ?

कर्णः—(विहस्य) एवं रणभीरुरहम् । न जाने त्वं पितरमनुस्मृत्य किं करिष्यसीति । मौलिदलनेऽपि शूरेण तव पित्रा स्त्रियेवोदासितम् ।

अश्वत्थामा—राजवल्लभ, सूतापसद ! भयेन वा दुःखेन वा द्रुपदतनयपाणिस्तेन न निवारितः । तव शिरसि न्यस्तं वामं पादं वारय । (इति तथाकर्तुमुत्तिष्ठति)

(कृपदुर्योधनौ निवारयतः)

(अश्वत्थामा चरणप्रहारं नाटयति)

कर्णः—(खड्गमाकृष्य) जात्या त्वमवध्यः । आयुधं तूद्धृतम् । अनेन लूनं भूमौ पतितं तव चरणं पश्यसि ।

अश्वत्थामा—जात्याहं काममवध्यः ? इयं सा जातिः परित्यक्ता । (इति यज्ञोपवीतं छिनत्ति । (पुनश्च सक्रोधम्)

अद्य मिथ्याप्रतिज्ञोऽसौ किरीटी क्रियते मया ।
शस्त्रं गृहाण वा त्यक्त्वा मौलौ वा रचयाञ्जलिम् ॥ १३ ॥

(खड्गमाकृष्यान्योन्यं प्रहर्तुमिच्छतः । कृपदुर्योधनौ वारयतः)

कर्णः—राजन्नहं न निवारयितव्यः । उपेक्षितस्य अत्रासितस्य इयं विकत्थना भवति ।

अश्वत्थामा—मातुल ! मां न निवारय । राजन्मुञ्चैनम् । अयं पापः कथं गुणिनस्तव सखा । अहं किरीटिनं हन्याम् । अकर्णमपृथात्मजमद्य लोकं कुर्याम् । (इति प्रहर्तुमिच्छति)

दुर्योधनः—कर्ण ! गुरुपुत्र ! कोऽयं युवयोर्व्यामोहः ?

कृपः—अन्यदेव प्रस्तुतम्। अन्यत्रावेग इति कोऽयं ते व्यामोहः। स्वबल-व्यसनं युष्मत्त एव भवतीति वामः पन्थाः।

अश्वत्थामा—न लभ्यतेऽस्य कटुप्रलापिनो दर्पः शातयितुम्।

कृपः—अकालः खलु स्वबलप्रधानविरोधस्य।

अश्वत्थामा—मातुल! यद्येवं—

अयं पापो यावन्न निधनमुपेयादरिशरैः
परित्यक्तं तावत्प्रियमपि मयास्त्रं रणमुखे।
बलानां नाथेऽस्मिन्परिकुपितभीमार्जुनभये
समुत्पन्ने राजा प्रियसखबलं वेत्तु समरे॥ १४॥

(इति खड्गमुत्सृजति)

कर्णः—कुलक्रमागतमेतद्भवादृशाम्।

अश्वत्थामा—अपरित्यक्तमप्यायुधं भवादृशैश्चिरपरित्यक्तमेव। निष्फल-त्वात्।

कर्णः—

धृतायुधो यावदहं तावदन्यैः किमायुधैः।
यद्वा न सिद्धमस्त्रेण मम चेत्केन सेत्स्यति॥ १५॥

(नेपथ्ये)

आः! दुरात्मन्! द्रौपदीकेशाम्बराकर्षणमहापातकिन्! चिरस्य खलु कालस्य मत्साम्मुखीनमागतोऽसि। क्षुद्रपशो! क्वेदानीं गम्यते? भो भोः! दुर्योधनसौबलप्रभृतयः पाण्डवविद्वेषिणः मानधनाः महारथाः! शृण्वन्तु भवन्तः—

कृष्टा येन शिरोरुहे नृपशुना पाञ्चालराजात्मजा
येनास्याः परिधानमप्यपहृतं राज्ञां गुरूणां पुरः।
यस्योरस्थलशोणितासव[71]महं पातुं प्रतिज्ञातवान्
सोयं [72]मद्भुजपञ्जरे निपतितः संरक्ष्यतां कौरवाः॥ १६॥

अश्वत्थामा—(सोत्प्रासम्) अङ्गराज! सेनापते! जामदग्न्यप्रियाशिष्य! द्रोणापहासिन्! भुजबलसंरक्षितसकललोक! (धृतायुध इति पठित्वा) इदं तदासन्नतरमेव संवृत्तम्। रक्षैनं साम्प्रतं भीमाद्दुश्शासनम्।

कर्णः—युवराज! न भेतव्यम्। न भेतव्यम्। अयमहमागत एव। (इति निष्क्रान्तः)

अश्वत्थामा—अभीष्ममद्रोणं भवद्बलमालोडयन्तौ भीमार्जुनौ राधेयेनैवंविधेनान्येन वा निवारयितुं न शक्येते। अतस्त्वमपि भ्रातुः पतीकारपरो भव।

दुर्योधनः—वत्स! न भेतव्यम्। न भेतव्यम्। कः कोऽत्र भोः रथमुपनय। (इति निष्क्रान्तः)

(नेपथ्ये कलकलः)

अश्वत्थामा—मातुल, कष्टम्। पीतं दुश्शासनशोणितं भीमेन। किरीटी समं दुर्योधनराधेयौ शरवर्षैरभिद्रवति। अनृतमनृतं नाम। शास्त्रं शस्त्रम्। (इति खड्गं गृहीतुमिच्छति).

(नेपथ्ये)

महात्मन्, भारद्वाजसूनो! न खलु सत्यवचनमुल्लङ्घितुमर्हसि।

कृपः—वत्स! अशरीरिणी वाग्भवन्तं निवारयति।

अश्वत्थामा—सर्वथा पाण्डवपक्षपातिनो देवाः। कष्टं कष्टम्।

दुश्शासनस्य रुधिरे पीयमानेऽप्युदासितम्।
दुर्योधनस्य कर्तास्मि किमन्यत्प्रियमाहवे ॥ १७ ॥

राधेयक्रोधवशादनार्यमाचरितं मया। त्वमप्यस्य राज्ञः पार्श्वपरिवर्ती भव।

कृपः—गच्छाम्यहमत्र। भवानपि शिबिरसन्निवेशमेव प्रतिष्ठताम्[1]।

(निष्क्रान्तौ)

इति तृतीयोऽङ्कः.

चारुदत्तकथा.

ಚಾರುದತ್ತ ನಾಟಕವನ್ನು ಕವಿವರೇಣ್ಯನಾದ ಭಾಸನು ರಚಿಸಿದನೆಂದು ನಂಬಲಾಗಿದೆ. ಪುರಾತನ ವೈಭವದ ಕೇಂದ್ರಸ್ಥಾನವಾಗಿದ್ದ ಉಜ್ಜಯಿನೀ ಪಟ್ಟಣದಲ್ಲಿ ಮಹಾ ಕುಲಪ್ರಸೂತನೂ ಆಗರ್ಭಶ್ರೀಮಂತನೂ ಆದ ಚಾರುದತ್ತನೆಂಬ ಬ್ರಾಹ್ಮಣೋತ್ತಮನಿದ್ದನು. ಅವನ ಔದಾರ್ಯವೂ ಕಲಾಭಿಮಾನವೂ ಲೋಕೋತ್ತರವಾಗಿದ್ದವು. ಕ್ರಮೇಣ ಅವನ ಔದಾರ್ಯವು ಮಿತಿಮೀರಿ ಕೊನೆಗೆ ದಟ್ಟದರಿದ್ರನಾದನು. ಬಂಧು ಮಿತ್ರರು ದೂರವಾದರು. ಆದರೆ ದೈವವಶದಿಂದ ಅವನಲ್ಲಿ ರೂಢಮೂಲವಾಗಿದ್ದ ಸದ್ಬುದ್ಧಿ ಸೌಜನ್ಯಗಳು ಮಾತ್ರ ದೂರವಾಗಲಿಲ್ಲ. ಈ ಗುಣಾತಿಶಯಗಳನ್ನು ಕೇಳಿ ಆ ನಗರದ ಗಣಿಕಾಪ್ರಪಂಚದಲ್ಲಿ ಶ್ರೇಷ್ಠತೆಯನ್ನು ಪಡೆದಿದ್ದ ವಸಂತಸೇನೆಯು ಚಾರುದತ್ತನನ್ನು ಪ್ರೀತಿಸಿದ್ದಳು. ಅಷ್ಟೈಶ್ವರ್ಯಸಂಪನ್ನಳಾದ ಈ ಸುಂದರಿಯು ಅಷ್ಟೈಶ್ವರ್ಯವನ್ನೂ ತೃಣಗಣಾಯಮಾನವಾಗಿ ನೀಗಿದ್ದ ದರಿದ್ರ ಚಾರುದತ್ತನಲ್ಲಿ ಅನುರಾಗವನ್ನಿಟ್ಟು ಒಂದು ದೊಡ್ಡಮಾರ್ಗವನ್ನು ತೋರಿಸಿಕೊಟ್ಟಳೆಂಬುದು ಈ ನಾಟಕದ ಕಥಾವಸ್ತು.

ಕವಿಕುಲೋತ್ತಂಸನಾದ ಕಾಳಿದಾಸನೇ ತನ್ನ ಗ್ರಂಥದಲ್ಲಿ[1] ಭಾಸನ ಯಶಸ್ಸನ್ನು ಕೊಂಡಾಡಿರುವನಾದರೂ ಈ ಮಹಾಕವಿಯ ಗ್ರಂಥಗಳು ಇತ್ತೀಚಿನವರೆಗೆ ಲಭಿಸಿರಲಿಲ್ಲ. ಕ್ರಿ. ಶ. 1910ರಲ್ಲಿ ತಿರುವಾಂಕೂರಿನಲ್ಲಿ ಪ್ರಸಿದ್ಧರಾಗಿದ್ದ ಗಣಪತಿಶಾಸ್ತ್ರಿಗಳೆಂಬ ಪಂಡಿತರು ಹದಿಮೂರು ರೂಪಕಗಳನ್ನು ಪತ್ತೆಮಾಡಿ ಅವೆಲ್ಲವೂ ಭಾಸಪ್ರಣೀತಗಳೆಂದು ಸಮರ್ಥಿಸಿದರು. ಸಾಮಾನ್ಯವಾಗಿ ನಾಟಕದ ಪ್ರಸ್ತಾವನೆಯಲ್ಲಿ ಕವಿಗಳು ತಮ್ಮ ಮತ್ತು ತಮ್ಮ ಗ್ರಂಥದ ಪರಿಚಯಮಾಡಿಕೊಡುವುದು ಪದ್ಧತಿ. ಆದರೆ ಈ ಹೊಸ ನಾಟಕಚಕ್ರದಲ್ಲಿ ಯಾವುದರಲ್ಲಿಯೂ ಕವಿಯ ಹೆಸರು ಹೇಳಲ್ಪಟ್ಟಿಲ್ಲ. ಆದುದರಿಂದ ಈ ಹದಿಮೂರು ನಾಟಕಗಳನ್ನು ಭಾಸಕವಿಯೇ ಬರೆದನೇ ಎಂಬ ಬಲವಾದ ಶಂಕೆ ಹುಟ್ಟಿ ಈಗಲೂ ಕೆಲವರು ಭಾಸಪ್ರಣೀತವೆಂಬುದನ್ನು ಒಪ್ಪುವುದಿಲ್ಲ. ಅಂತು ಈ ನಾಟಕಗಳಲ್ಲಿ ಉಪಯೋಗಿಸಲ್ಪಟ್ಟಿರುವ ಸ್ಥಾಪನೆ, ಭರತವಾಕ್ಯ, ಭಾಷೆ, ಶೈಲಿ ಮುಂತಾದುವುಗಳಲ್ಲಿ ಅನ್ಯೋನ್ಯ ಸಾಮ್ಯವಿರುವುದರಿಂದ ಇವುಗಳೆಲ್ಲವನ್ನೂ ಒಬ್ಬನೇ ರಚಿಸಿದನೆಂದು ನಂಬಬಹುದು. ಮತ್ತು ಈ ರೂಪಕಗಳಲ್ಲೊಂದಾದ ಸ್ವಪ್ನವಾಸವದತ್ತವೆಂದು ಭಾಸಕೃತವೆಂದು ರಾಜಶೇಖರಾದಿಗಳು ನಿರ್ದೇಶಮಾಡಿರುವುದರಿಂದ ಹದಿಮೂರು ರೂಪಕಗಳೂ

ಭಾಸಕೃತಗಳೇ ಎಂದೂ ನಂಬಬಹುದಾಗಿದೆ. ಈ ಕವಿಯು ಸುಮಾರು ಕ್ರಿ. ಶ. 300ರಲ್ಲಿದ್ದನೆಂದು ಬಹುಮತಾಭಿಪ್ರಾಯ.

ಭಾಸಮಹಾಕವಿಯನ್ನು ಕಾಳಿದಾಸನಲ್ಲದೆ, ಬಾಣಭಟ್ಟ,[2] ರಾಜಶೇಖರ,[3] ವಾಕ್ಪತಿರಾಜ,[4] ಜಯದೇವ,[5] ಭಾಮಹ, ವಾಮನ, ಅಭಿನವಗುಪ್ತ ಮುಂತಾದ ಕವೀಶ್ವರರೂ ಆಲಂಕಾರಿಕರೂ ಸ್ಮರಿಸಿದ್ದಾರೆ. ಭಾಸನಾಟಕ ಚಕ್ರದಲ್ಲಿ[6] ಸ್ವಪ್ನವಾಸವದತ್ತವು ಅತ್ಯುತ್ತಮವಾದುದು. ಈ ನಾಟಕಗಳ ಕಥಾವಸ್ತು ರಾಮಾಯಣ, ಮಹಾಭಾರತ, ಭಾಗವತ, ಬೃಹತ್ಕಥೆಗಳಿಂದ ತೆಗೆದುಕೊಂಡದ್ದಾಗಿದೆ. ಭಾಸನು ಲಾಕ್ಷಣಿಕರ ವಶನಾಗದೆ ಸ್ವತಂತ್ರಮಾರ್ಗವನ್ನನುಸರಿಸಿ ಶ್ಲಾಘ್ಯವಾದ ರೂಪಕಸಮುದಾಯದಿಂದ ಲೋಕರಂಜನೆಯನ್ನುಂಟುಮಾಡಿರುವನು.

ಟಿಪ್ಪಣಿ.

[1] ಮಾಲವಿಕಾಗ್ನಿಮಿತ್ರದ ಪ್ರಸ್ತಾವನೆಯನ್ನು ನೋಡಿ.

[2] ಹರ್ಷಚರಿತ್ರೆಯ ಉಪೋದ್ಘಾತ ಶ್ಲೋಕಗಳನ್ನು ನೋಡಿ.

[3] ಭಾಸನಾಟಕ ಚಕ್ರೇಽಪಿ ಛೇಕೈಃ ಕ್ಷಿಪ್ತೇ ಪರೀಕ್ಷಿತುಮ್ । ಸ್ವಪ್ನವಾಸವದತ್ತಸ್ಯ ದಾಹಕೋಽಭೂನ್ನ ಪಾವಕಃ ॥—ರಾಜಶೇಖರ ಕವಿ.

[4] ವಾಕ್ಪತಿರಾಜನು ತನ್ನ "ಗೌಡವಹೋ" ಎಂಬ ಪ್ರಾಕೃತ ಗ್ರಂಥದಲ್ಲಿ ಭಾಸನನ್ನು "ಜ್ವಲನಮಿತ್ರ" ಎಂದು ಕರೆದಿದ್ದಾನೆ.

[5] ಯಸ್ಯಾಶ್ಚೋರಶ್ಚಿಕುರನಿಕರಃ ಕರ್ಣಪೂರೋಮಯೂರೋ
"ಭಾಸೋ ಹಾಸಃ" ಕವಿಕುಲಗುರುಃ ಕಾಳಿದಾಸೋ ವಿಲಾಸಃ ।
ಹರ್ಷೋ ಹರ್ಷೋ ಹೃದಯವಸತಿಃ ಪಞ್ಚಬಾಣಸ್ತು ಬಾಣಃ
ಕೇಷಾಂ ನೈಷಾ ಕಥಯ ಕವಿತಾಕಾಮಿನೀ ಕೌತುಕಾಯ ॥
(ಜಯದೇವನ ಪ್ರಸನ್ನರಾಘವದಲ್ಲಿ.)

[6] ಸ್ವಪ್ನವಾಸವದತ್ತ, ಪ್ರತಿಜ್ಞಾಯೌಗಂಧರಾಯಣ, ಪ್ರತಿಮಾ, ಅಭಿಷೇಕ, ಚಾರುದತ್ತ, ಅವಿಮಾರಕ, ಬಾಲಚರಿತ, ದೂತವಾಕ್ಯ, ದೂತಘಟೋತ್ಕಚ, ಮಧ್ಯಮವ್ಯಾಯೋಗ, ಪಂಚರಾತ್ರ, ಕರ್ಣಭಾರ, ಊರುಭಙ್ಗ—ಇವು ಪ್ರಕೃತದಲ್ಲಿ ಭಾಸನಾಟಕ ಚಕ್ರವೆಂಬ ಹೆಸರಿನಿಂದ ಪ್ರಖ್ಯಾತವಾಗಿವೆ.

चारुदत्तम्.

आसीत्पुरा भरतवर्षे भरतखण्डे सकलविभवसमृद्धं समुद्रपत्तनं नाम नगरम् । हर्म्यै राजवीथिभिरौषधागारैर्विहारभूमिभिर्विपणिवीथिभिः उद्यानैर्विद्यागारै राजकुलेन च विराजितं धनिभिश्शूरैर्धानुष्कैर्धीरैर्विद्वद्भिस्तुष्टैर्दान्तैश्शान्तैर्महाजनैश्चाधिष्ठितं विजितालकामरावति यद्रराज ॥

तस्मिन्नगरे श्रेष्ठिचत्वरे आढ्यः, उदारः, आचितः, दक्षः, परोपकारनिरतः, कलाचतुरः, गुणाभिमानी, सज्जनप्रियः, गरिष्ठो, वरिष्ठः, चारुदत्तो नाम ब्राह्मणः प्रतिवसति स्म ॥

सावित्रीव सत्यवतः, दमयन्तीव नलस्य, अरुन्धतीव वसिष्ठस्य, शकुन्तलेव दुष्यन्तस्य पतिव्रता धूता नाम ब्राह्मणी तस्य सती बभूव । यया समसुखदुःखभागिन्या ससुखमुवास ॥

स च नौकावाणिज्येन महतीं श्रियं समपादयत् । पूर्वपुण्यविभवव्ययलब्धाः संपदो विपद एवेति विमृश्य सः पात्रपाणिकमलार्पणमेव तासु शान्तिकविधिं विधिदृष्टं विन्ययुनक् । अनासादितमनोरथः न कोऽपि याचकः तस्मात्प्रतिन्यवर्तत । यतः शास्त्रसंस्कृतबुद्धिस्स सम्यग्विचचार अनवाप्तकामो याचकः स्वस्मै दुष्कृतं दत्वा सुकृतमादाय गच्छतीति । अतः अस्य शरच्चन्द्र इव निर्मलं यशः त्रिलोक्यमपि सञ्चचार ॥

भाग्यं चक्रारपङ्क्तिरिव परिवर्तते । श्रीर्दुर्विनीतेव न कुत्रापि नैष्ठिकीं स्थितिं प्राप्नोति । इयं शूराद्भीतेव पलायते । विद्वांसं ईर्ष्ययेव परित्यजति । गुणं नावेक्षते ॥

कदाचिदस्य नावः सागरे वात्यया नेशुः । निखिलमपि ऐश्वर्यं एकपदे रसातलं जगाम । चारुदत्तः दरिद्रः समजनि । तथापि

प्रकृतिर्वा शीलं वा पुरेवावर्तत । तत्तत्काले विहितं कर्माचरन् निषिद्धं परित्यजन् अतिथीन् सत्कुर्वन् देवता आराधयन्नवर्तत ॥

विपत्सौहृदस्य परीक्षानिकषोपलः । संपदि य एनमन्वगच्छंस्त एनं विपद्यमुञ्चन् । एतद्दृष्ट्वायमतीवाखिद्यत ॥

विदूषकः ब्राह्मणो मैत्रेयः परं अस्य परमं मित्रम् । स तदाप्येनं छायेवान्ववर्तत । अयं चारुदत्तेन सह संपदि सुखं विपदि कष्टं चानुभवितुं सिद्धोऽवर्तत ॥

कस्यांचिद्रात्र्यां गाढेन सूचिभेद्येन तमसा परीतायां पार्श्ववर्तिनं विदूषकमालोक्य चारुदत्त उवाच,—'सखे! पश्य, दारिद्र्यं जीवन्मृतिः । अथवा मरणादतिरिच्यते । अल्पक्लेशं मरणम् । दारिद्र्यमनन्तकं दुःखम् । मम देहली पूर्वं बलिं विलुम्पद्भिः हंसैस्सारसैश्च रराज । अधुना तु तत्रैव कीटमुखात्परिभ्रष्टा धान्यकणाः पतन्ति । न तु बलिमपहर्तुं पक्षिणः । अन्यच्चेदं मामतीव बाधते । यत्सुहृदोऽपि अपरिचिता इव, उदासीना इव मया संभाषितुमपि नोत्सहन्ते । यच्च ते मत्तः परावर्तन्ते । दरिद्रोऽयं अस्मान्याचेतेति किं ते तथा कुर्वते? नाहं नष्टां श्रियमनुशोचामि । अपि तु याचका मत्तोऽनवाप्तकामाः निराशाः प्रतिनिवर्तन्त' इति खिद्ये । अद्यापि त्वमेक एव मे प्रियसुहृत् । प्रयोजनं विनापि यन्मामनुवर्तसे । अथ वा नानुशोचाम्यहं दारिद्र्यम् । यतस्तन्मयि नास्ति । दरिद्रेषु दुर्लभं त्रितयं मयि वर्तते । सत्वापरिभ्रंशः समदुःखभाङ्मित्रं त्वं सर्वास्वपि दशास्वनुकूला सती सती धूता चेति मम तोषहेतवः । गच्छ चतुष्पथम् । मातृभ्यो बलिमुपाहर' इति ॥

परिहासशीलस्स तु प्रतिजगाद—'नाहं गच्छामि । यत आदर्शगतेव छाया मम बुद्धिर्वामेषु दक्षिणा दक्षिणेषु वामा । अत्र न मे श्रद्धा' इति ॥

‘मूर्ख ! धिक्त्वां । भक्त्या तुष्यन्ति दैवतानि । पत्रेण फलेन पुष्पेण वा तानि प्रीयन्ते ।’ इति पुनरपि स तमादिदेश ॥

एवं वाचनिरुद्धायां स मैत्रेयः गाढे तमसि चतुष्पथमेकाकी गन्तुं नाशक्नोत् । उपायाचत च सहायम् । आज्ञप्ता च चारुदत्तेन चेटी रदनिका तमनुयातुम् । यदा च मैत्रेयस्सः नाभ्युपजगाम देवानामाराधनं, तदा दीपिकां दधत् रदनिकामनुयाहीति तं स आज्ञापयामास । स तमादेशमङ्गीचकार । चतुश्शालाद्दीपमादाय रदनिकामनुययौ ॥

अपावृत्य पक्षद्वारं सा तु मैत्रेयेणानुगम्यमाना यावदागच्छति शृङ्गाटकं तावदनुगन्तुस्तस्य हस्ते स्थितो दीपः सहसा निर्वापितः । मैत्रेयः रदनिका च अपावृतपक्षद्वारेण पिण्डीकृतप्रविष्टो वातः दीपं निरवापयदिति मेनाते । रदनिका तत्रैव स्थिता । मैत्रेयस्तु प्रविवेशाभ्यन्तरं पुनरपि दीपमानेतुम् ॥

तस्मिन्नवसरे वसन्तसेना नाम गणिकादारिका आढ्यं शकारापरनामानं राज्ञः श्यालं संस्थानकं तिरस्कृत्य गुणिनं चारुदत्तमनुरक्ता तमभिसरन्ती विटशकाराभ्यामन्वधाव्यत । स्त्रीणामनुरागे गुणाः कारणं न तु धनम् । अयं शकारः मत्तः, क्रूरः, पापी स्त्रीवधजन्यादपि पातकादबिभ्यत् तामनुससार । विटोऽपि तमन्वगच्छत् । पलायमानां तां गाढोऽन्धकारः पापात्तस्माद्ररक्ष । विशालाक्षी तन्वङ्गी शरविद्धहरिणीव वेपमाना अलङ्कृतसर्वाङ्गी स्रस्तकचभरा धावन्ती यावच्चारुदत्तस्य गृहपरिसरं जगाम तावद्दिष्ट्या पक्षद्वारमपावृतम् ॥

अदत्तप्रवेशाभ्यनुज्ञापि गत्यन्तरमजानाना मैत्रेयस्य हस्ते स्थितां दीपिकां निर्वाप्य ताभ्यामदृष्टा प्रविवेशाभ्यन्तरम् । मैत्रेयः रदनिकां तत्रैव संस्थाप्य दीपिकां पुनरप्युज्ज्वाल्यानेतुं निववृते । रदनिका पक्षद्वारनिकटे तस्थौ । गणिका तु गृहाभ्यन्तरमाजगाम । प्रकाशवैरल्याद्व्यक्तिस्वरूपमजानानः चारुदत्तः तस्या उपरि रदनिकाभ्रान्त्या दयया शीताद्वाताद्रक्षितुं प्रावारकं चिक्षेप । स तु तत्कालीनस्समुदाचारः ।

अननुज्ञातप्रवेशा गणिका लज्जया न किंचित्प्रतिवचनं ददौ । चारुदत्तेन पुनःपुनरपि अभ्यन्तरचतुश्शालप्रवेशाय प्रावारकावगुण्ठनाय च बलात्कृतापि सा तूष्णीमेवासाञ्चक्रे ॥

एतावत्या कालकलया विटशकारौ तत्रागतौ । रदनिकां दृष्ट्वा विटस्तया वराकं वञ्चयितुं तं तां गृहीतुं नुनोद । मूढः स तथैवाकरोत् । बलात्तामाचकर्ष च । तथा परिभूता सा तं पद्भ्यां ताडयन्ती रुदन्ती सदीपं प्रतिनिवृत्ताय मैत्रेयाय तं परिभवं निजगाद । खड्गहस्तं विटं शकारं चावलोक्य शङ्कमानः स तौ पप्रछ, 'अयं किमवलेप उत परिभव इति ।' विटः प्रतिजगाद तं, 'न सोऽवलेपः । अपि तु अज्ञानादनुष्ठितं कर्म । अन्यभ्रान्त्या तत्कृतमिति ।' तं परिभवं मर्षयितुं प्रार्थयामास । चारुदत्ताय तन्न कथयितव्यमिति ययाचे च ॥

संस्थानकः पप्रच्छ, 'भाव! किन्त्वं बिभेषि दरिद्राच्चारुदत्तात् । यतस्त्वं तस्य मर्षणां प्रार्थयसे । रे दरिद्रस्य मित्र, ब्राह्मणब्रुव! वद तं दरिद्रं चारुदत्तं अस्मद्वचसा, 'वसन्तसेनेति काचन नाटकस्त्री धृतसकलाभरणा त्वयि गाढमनुरक्ता मयि चाननुरक्ता बलात्कारेणानुनीयमानापि अद्य प्रविष्टा तव गृहम् । श्वस्सा निखिलैराभरणैस्सह निर्यातयितव्या । अन्यथा तव मम च महद्वैरं भवेदिति '॥

तथेति मैत्रेय उक्त्वा करधृतया दीपिकया तमुद्वेजयित्वा, विटं प्रति 'न त्वमपराद्धा । अपि तु त्वयानुनीतोऽहम् ।' इति निगद्य, आकस्मिकेन अज्ञानादुपस्थितेन परिभवेन चित्तक्षोभ मोद्वहेति' रदनिकां समाधाय, तया सहान्तःप्रविश्य शकारसन्देशनिवेदनपूर्वकं कृतं देवकार्यमिति चारुदत्ताय जगाद ॥

यदा चारुदत्तः विदूषकेनसहागतां रदनिकां ददर्श तदा स्वेन वाससा काञ्चन परां स्त्रियं धर्षितां चिन्तयित्वा चिखेद । अन्यभ्रान्त्या समुदाचार इति मम प्रावारकेण धर्षितासि भद्रे! मर्षय ममेममेकमपराधं इति तां ययाचे ॥

गणिका लज्जां परित्यज्य बभाषे, ‘ अहं शरणागतास्मि । आभरणनिमित्तं इमे पापा मामनुधावन्ति । अतोऽयं आभरणसम्पुटकः अत्रैव स्थीयताम् । आर्येण रक्षिताहमिच्छामि गृहं प्रति निवर्तितुम् । ’ इति ॥

चारुदत्तः तस्मिन्विषमे काले तद्रक्षणं दुष्करमिति विवेद । तथापि शरणागतरक्षणं परमो धर्म इति कृत्वा तदङ्गीचकार । तान्यादातुं विदूषकमादिदेश । स तन्नानुमेने । पुनरपि चारुदत्तस्तं निर्बबन्ध । अष्टम्यामनध्याये च तद्रक्षणं मैत्रेय अभ्यन्वजानात् । चेटी रदनिका इतरस्मिन्काले तं संपुटं रक्षेदिति व्यवस्था कृता । ‘ स्वाध्यायमध्येतुं प्रवृत्तस्य भर्तृदारकस्य तदावसरो भवतीति ’ तं परिहस्य रदनिका व्यवस्थानुरोधेन तं प्रतिजग्राह ॥

गणिकां गृहं प्रेषयितुं अभ्यन्तरचतुश्शालाद्दीपमानेतुं मैत्रेयं चारुदत्त आज्ञापयामास । दीपिका गणिकेव निःस्नेहा सञ्जाता । तदा दययेवामृतकिरणः भगवाञ्छशी उदयगिरिशिखरमारुरोह । विनैव दीपिकासाहाय्यं शरणागतां वसन्तसेनां गृहं प्रेषयितुं अवसरस्सञ्जातः । चारुदत्तादेशेन गणिका मैत्रेयेणानुगम्यमाना स्वं गृहमाययौ ॥

इयं गणिका श्रुत्वा चारुदत्तस्य गुणान् तस्मिन्प्रथममनुरज्ज । कामदेवायतने तं दृष्ट्वा अतीव विरहातुराखिद्यत । तस्य वरणे क उपाय इति चिन्तयन्ती अवर्तत । चेटी अभिसरणमेवोपायं स्मारयामास । तत्सा न प्रतिजग्राह । तस्मिन्नवसरे कश्चन सत्वरमाधाव्य वसन्तसेनां शरणं ययाचे । अभयं सा तस्मै दत्तवती । चेटी तु तं साहसिकं मत्वा शरणं दातुमयुक्तमिति असूचयत् । गुणवानेव शरणागतो रक्षणीयः न तु निर्गुण इति न नियमः । गुणी वा निर्गुणो वा यः कोपि शरणमागतो रक्षणीय एव । कस्माद्भयमार्यस्येति दूतीमुखेन पृष्ट्वा धनिकाद्भयमिति ज्ञात्वा आसने शरणागतमुपवेश्य स्वहस्तात्कटकमवमुच्य तेन द्वारि तिष्ठन्तं सन्तोषयामास । पप्रच्छ च ऋणनिमित्तं शरणागतस्य जन्मभूम्यादिकम् । स तु प्रत्युवाच — ‘ पाटलिपुत्रमा-

स्मनो जन्मभूमिः । कलेति संवाहनं अधीतम् । तदाजीवितं जीवितं संवृत्तम् । आगन्तुकेभ्यः श्रुत्वा चारुदत्तस्य गुणान् समुद्रपत्तनमागत्य संवाहनकलया तमुपचरन् तस्योपजीवी समजनि । भाग्यपरिवृत्या नौकासु सागरजले मज्जन्तीषु यदा दक्षिणः उदारः दक्षः तृप्तः आचितः सुन्दरः धनी गुणी आर्यः चारुदत्तः दरिद्रः सञ्जातः, तदा स उपजीविनः अन्यं यं कमपि जीविकायै आश्रयितुं अनुमेन । तथैवेतरे अन्यत्र गताः । अयं जनः मृदुं तस्य तनुं संवाह्य इतरं उपचरितुं अनिच्छन् द्यूतोपजीवी संवृत्तः । अनेकवारं स्वेन पराजिताय तदानीं स्वं पराजितवते यस्मै कस्मैचिद्दशसुवर्णमधारयत् । वीथ्यां यदृच्छागतेन तेन दृष्टः तस्माद्भीत्या तत्र पलाय्य शरणमागत इति ॥ '

गणिका तमुवाच—' अधुना आर्यः राजमार्गे निर्भयं चरतु । मित्रदर्शनेन सुखमनुभवतु । ' इति ॥

अयन्तु संवाहनकलां गणिकाया अनुचरासु संक्रामयितुं तस्या अनुज्ञां अयाचत । प्रत्युपकारापेक्षया न सा कृतं नाशयितुं ऐच्छत् । ततः स यदृच्छया जगाम ॥

एतस्मिन्नवसरे कर्णपूरनामा कश्चन चेटः सत्वरं ससंभ्रमं चाधाव्य स्वामिन्यै वसन्तसेनायै चारुदत्तेन दत्तं पारितोषिकं जातीकुसुमवासितं प्रावारकं दर्शयामास । न्यरूपयच्च तन्निमित्तम् । गणिकाया मत्तो हस्ती भद्रकपोतको नाम आलानमुन्मूल्य राजमार्गे यदृच्छया परिसरन् धावत्सु भीत्या जनेषु मुण्डितमण्डं कषायवाससं कञ्चन परिव्राजकं करेणोद्धृत्य दन्तान्तरे विन्यस्य मर्दयितुमारेभे । सर्वोऽपि जनः हा हतोऽयं मन्दभाग्यस्तपस्वीत्युक्त्वा परितोऽधावन् । न कोऽपि तं तस्मान्मोचयितुं नायतत । अयं तु चेटः सधैर्यं सत्वरमनुधाव्य ताडनेन हस्तिनं परावर्त्य दन्तान्तरे परिलुठन्तं दीनं क्षपणकं व्यमोचयत् । तत्रस्थो जनः 'इदं चेटस्य कर्मेति श्लाघमानोऽपि साहसिकाय न किंचिद्दत्तवान् । एकः परं तेन कर्मणा तुष्यन् न

किंचिदप्युक्त्वा आभरणस्थानानि परामृश्य न किंचिदपि दातुमलब्ध्वा दीर्घं उष्णं च विनिश्वस्य एतावान्मे विभव इत्युक्त्वा प्रावारकमुपग्राह्य चेटाय प्रेषितवान् । यज्ञोपवीतमात्रोत्तरीयः राजवीथ्यां स्वगृहं जगाम इति ॥

यथा निरूपितं तत्रैव गच्छन्तं तं चारुदत्तमेव ज्ञात्वा तुष्यन्ती वसन्तसेना तमुपयन्तुं अभिललाष ॥

कतिपयेषु दिनेषु गच्छत्सु अष्टमी प्राप्ता । तस्मिन्नगरे गानगोष्ठी काचन प्रचचाल । गीतकलायामासक्तः चारुदत्तः तां गोष्ठीमलञ्चकार । भावो रेभिलः वीणावादनपटुः वीणां सम्यगवादयत् । रसिका गानश्रवणेन परां मुदं प्रापन् । शिर आन्दोलयित्वा तदभिननन्दुश्च । गानरसमभिनन्दतः चारुदत्तस्य रात्र्या अर्धं अतीतम् । गानकलाचतुरं रेभिलं श्लाघमानः मैत्रेयेण साकं स्वगृहं प्रति न्यवर्तत । मैत्रेयस्तु रेभिलं निनिन्द । यतः पठन्तीं स्त्रियं गायन्तं मनुष्यं च स नाभिननन्द । यतः पठन्ती स्त्री च्छिन्ननासिकेव धेनुरतिविरूपा भवति। गायन्ना च लुठन्गर्दभ इव मनो न हरति ॥

वीथ्यां कुक्कुरा अप्यवसुप्ताः । निश्शब्दा नगर्यपि सुप्तेवाबभौ । जरेव मनुष्यसत्त्वं परिभवन्ती निद्रापि चारुदत्तस्य मैत्रेयस्य च नयने अवललम्बे । यदा तौ शेतुं येताते तदा रदनिका आभरणसमुद्गकहस्ता आगत्य अष्टमीं संस्मार्य विदूषकहस्ते तं आभरणसमुद्गकं निचिक्षेप । स तु जीर्णप्रावारकप्रावृतं बाहुमूले सुदृढं विन्यस्य निद्रितुमारेभे । चारुदत्तोऽपि सुष्वाप ॥

तदा शर्विलको नाम कश्चन आगन्तुकः साहसिकः वसन्तसेनाचेट्यां मदनिकायामनुरक्तः दासीभावेन तां विमोच्योपयन्तुं निश्चिकाय। चौर्यकलायामतीव निपुणस्सः धनार्जने उपायान्तरमजानानः चौर्येण धनमार्जयितुं येते । सुभगं चारुदत्तस्य भवनविन्यासं दृष्ट्वा तत्प्रत्यया तत्प्रवेष्टुमयतिष्ट । विस्मृतकर्मसूत्रः ब्रह्मसूत्रमेव कर्मसूत्रं चकार ।

वृक्षवाटिकापक्षद्वारे जलावसेकक्षारक्षीणेष्टिकायां भित्तौ सन्धिप्रकारेषु पूर्णकुम्भसिंहाक्रान्तादिषु सिंहाक्रान्तमेव सन्धिमाच्छिनत् । प्रतिमापुरुष-प्रवेशनेन सुप्तं गृहजनं निश्चिकाय । स्त्रीजनमपि तत्रासन्निहितं प्रत्यगात् । सिद्धं स्वकर्म निरधारयत् । न केनापि ज्ञातः अन्तर्विवेश । निश्शब्दं कवाटान्यपावृतानि । स गृहं शोधयितुमारेभे । न किमप्यर्घ्यं वस्तु तत्र तेन दृष्टम् । तत् दृष्ट्वा तन्नाट्याचार्यस्य गृहं इति निर्धृत्य स यावत्प्रतिनिवर्तितुमारेभे तावद्विदूषकेनोत्स्वप्नायितम् । ‘ मित्र ! सन्धिं छित्वास्मद्गृहं चोरः प्रविष्टः । इमं सुवर्णसमुद्गकं नाहं रक्षितुं शक्नोमि । तस्माद्गृहाणेमम् । शापितोऽसि ब्रह्मसूत्रेण यद्येनं न गृह्णासि ’ इति ॥

श्वाससमतया अवयवानां शय्याप्रमाणाधिकतया अलक्ष्यसुप्तमेव तं तत्स्वप्नवचनमेवेति निर्धार्य यावत्परितः पर्यैक्षत तावद्दृष्टवान्सः विदूषकस्य कक्षे जर्झरप्रावारकप्रावृतं रत्नभाण्डम् । झडिति भ्रमरकरण्डकादेकं पतङ्गं निरकाशयत् । येन दीपो निर्वापितः । ब्राह्मणेन विश्वासाद्दीयमानं हर्तव्यमासीदिति खिद्यमानोऽपि धनार्जने उपायान्तराभावात्तं गृहीत्वा यथागतं जगाम । दिष्ट्या कर्मान्ते सुप्रभातम् । सन्धिं छित्वा स्वकर्मसाधयतस्तस्य रात्रिरेव व्यरंसीत् । निद्राभावेन मन्थरगतिः त्वरिततरं यस्मिन्कस्मिंश्चिदागच्छति तृणेऽपि चलति विशङ्कमानः वसन्तसेनागृहपरिसरमागत्य मदनिकामाह्वयत् । शर्विलके दृढतरमनुरक्ता सा कण्ठस्वरेण तमागतं प्रियं ज्ञात्वा स्वामिनीं कार्यान्तरव्यापृतामवबुध्य सत्वरं बहिरागत्य शङ्कितवर्णमिव स्थितं तं ‘ किमेतदित्यपृच्छत् । प्रिये ! श्रूयतां रहस्यम् । त्वदर्थं मया साहसं कृतम् ’ । इति स तां प्रतिजगाद ॥

एतस्मिन्नन्तरे, वसन्तसेना अवसितप्रकृतव्यापारा विवृत्तवदना मदनिकामन्येन सह सानुरागं सल्लपन्तीं निरीक्ष्य, ‘ अनुरक्त इवायमस्याम् । यः कोऽप्ययं निष्क्रयेणेमां मां याचत इति संभावयामि । ‘ श्रूयतां रहस्यमित्ययमाह । न युक्तं परस्य रहस्यं श्रोतुम् ’ । इत्युक्त्वा ताभ्यां पराववृते ॥

तदा शर्विलकः ‘यदि वसन्तसेना त्वामिति’ वक्तुं प्रचक्रमे। श्रुत्वैतदहमेवास्मिन्रहस्ये अधिकृता। अतः नात्र किंचिदप्यनौचित्यमस्य रहस्यस्य श्रवणे’। इति तच्छ्रोतुमारेभे। स आगन्तुकः ‘निष्क्रयेण त्वां किं मह्यं दास्यति’ इति वाक्यशेषमपूरयत्। ‘त्वदर्थं रात्र्यां साहसं कृतमिति’ शर्विलकस्य वचः श्रुतवत्यौ ते उभे अपि चकिते बभूवतुः। कस्य गेहे त्वया चौर्यं कृतमिति’ मदनिका तं पप्रच्छ। प्रभाते मया श्रुतं श्रेष्ठिचत्वरे वसतः चारुदत्तस्य गृहे’ इति स उवाच। तदा अतीव ते संभ्रान्ते बभूवतुः। ‘निस्त्रिंश? रात्र्यां साहसं कुर्वता त्वया तस्मिन्गृहे न कोऽपि परिक्षतः व्यापादितो वा इति’ पृच्छन्तीं मदनिकां प्रति साशङ्कं शर्विलकः ‘अयि अनार्ये! त्वमन्यस्मिन्ननुरक्तेव मां प्रतिभासि। अन्यस्य पुरुषस्य नाम्नि श्रुतमात्र एव वेपमाना चकिताक्षी त्वं मां पृच्छसि। किमेतद्युक्तम्। स्त्री नाम परं शङ्का-स्थानम्। न सा विश्वासभूमिः कस्यापि। ममातीव कोपो जायते। किं तमहं हन्याम्। यस्मिंस्त्वमनुरक्ता’। इत्यादि उच्चावचं प्रलपन्तं तं मदनिका समाश्वासयत्। उक्तवती च—‘मम स्वामिनी अनुरक्ता चारुदत्तम्। अतस्त्वामपृच्छं तथा’ इति॥

तदा समाश्वस्तचित्तः सः ‘त्वदर्थं गत्यन्तरमजानता मया इदमकार्यं कृतम्। किमपरमप्यकार्यं कुर्याम्? किं नाहं ब्राह्मणः? सुप्तं स्त्रियं शिशुं ब्राह्मणं वा न हन्याम्’ इति स प्रत्युवाच॥

श्रुत्वा तस्य वचनं उभे अपि विषादं तत्यजतुः। ‘दर्शय तस्य गृहे अपहृतान्याभरणानि’ इति मदनिका तं प्रार्थयामास। सोऽदर्शयत्तानि। ‘दृष्टपूर्वाणीमान्याभरणानि। मम स्वामिन्या धृतानीमान्याभरणानि। यद्यज्जुका त्वां साहसिकं जानीयात् तर्हि मां तुभ्यं दातुं नेच्छेत्। तदा मम दासीभावान्मोक्षो न भवेत्। इमं साहसं कुर्वता त्वया उभे संशयिते तव कुलं चारित्रं च’। इति सा विषादेन निजगाद॥

‘युक्तमुक्तं त्वया । या शाखापत्रैर्वियोजिता सैव छायार्थिना मया संश्रिता । यस्या एवाभरणानि मयापहृतानि तामेवाहं शिश्रिये । ‘स्त्रियः चतुरा इति’ अभियुक्ता वदन्ति । वेशवाटनिवासेन त्वमतीव चतुरा । दर्शय मे मार्गम् । किमत्र मया प्रतिविधेयम्’ । इति सदैन्यं स तां ययाचे ॥

चतुरा सादिदेश ‘तान्याभरणानि चारुदत्ताय देयानीति’। क्रुद्धः सः रक्षिपुरुषैर्ग्राहयेदिति शङ्कया न तत्र गन्तुं शर्विलक ऐच्छत् । ‘कुलपुत्रः गुणी सस्तथा न कुर्यादेव प्रत्युत तुष्येत्’ इति मदनिका तत्र गन्तुं निर्बबन्ध । तमुपायं स नाङ्गीचकार । तदा, ‘वसन्तसेना वा आर्यचारुदत्तो वा आगन्तुकं न जानीयात् । स एवार्यः शिथिले स्वस्य निकेतने आभरणानि दुरारक्ष्याणीति इमानि तुभ्यं दातुं मां प्रैषयत्’। इत्युक्त्वा वसन्तसेनायै इमानि देयानि । तदा स आर्य अनृणः । स्वामिनी स्वान्याभरणानि प्राप्स्यति । अहं च दासीभावान्मोक्ष्ये’ इति सा उपायान्तरं निरदिशत् ॥

इदमुपायान्तरं तस्मै रुरोच । मदनिकां श्लाघमानः स तं अनुष्ठितुं सन्नद्धो बभूव। मदनिका तं तत्रैव संस्थाप्य स्वामिन्याः समयं प्रतीक्षितुं अन्तर्विवेश । शर्विलकस्थितः यथानिर्देशं तत्रैव कामदेवायतने मदनिका यावदभ्यन्तरं प्राविशत्तावद्वसन्तसेना स्वमासनं भेजे। मदनिका तु तां व्यापृतामेवाजानात् । चारुदत्तसकाशात् कश्चन आगत्य द्वारि अवसरप्रतीक्षया तिष्ठति इति तस्यै न्यवेदयत्। ‘शीघ्रं तमभ्यन्तरं प्रवेशये’ति आज्ञप्ता तया मदनिका तमभ्यन्तरं प्रावेशयत् ॥

प्रविश्य स कृतोचिताचारः निर्दिष्टे आसने उपविश्य, चारुदत्तेन प्रेषितानीति आभरणानि तस्यै समर्प्य, ‘त्वारततरं अनुष्ठेयं किंचित्कर्म वर्तते । अत आर्यया शीघ्रं विसर्जनीयोऽयं जन’ इति सः प्रार्थयामास। विहस्य वसन्तसेना कंचित्कालविलम्बं क्षमस्व । ‘प्रेषितान्याभरणान्यानीतवते मदनिका देयेति’ आर्यस्यादेशः। तत्प्रतीच्छत्वत्र-

भवानिमामिति अलङ्कृत्य स्वैराभरणैर्मदनिकां शर्विलकाय तामददात् । आर्याशब्देन तां संभाव्य जीविकायै प्रभूतं धनं तस्यै दत्वा सिद्धे प्रवहणे शर्विलकेन सह तामारोप्य तौ व्यसर्जयत् । तौ यथेच्छं गत्वा तत्रैव सुखमूषतुः ॥

रदनिका प्रभाते उत्थाय सन्धिं छिन्नं निरीक्ष्य सत्वरमागत्य मैत्रेयाय तं न्यरूपयत् । स च त्वरिततरं आगत्य चारुदत्तं परिबोध्य, 'मित्र ! प्रियं ते निवेदयामि' इति यावच्चोरकथां वक्तुमारेभे तावच्चारुदत्तः 'किं मे प्रियं किं वसन्तसेना प्राप्ता ?' इति स तं पप्रच्छ ॥

'न वसन्तसेना । अपि तु वसन्तसेनः । त्वं मां सदा निन्दसि मूर्खो मैत्रेय' इति । तव हस्ते आभरणानि रात्र्यां ददता मया शोभनं कृतम् । रात्र्यां ह्यः कश्चन चोरः अस्मद्गृहे सन्धिं छित्वा प्रविष्टः । अन्धकाराद्भीतेन रात्र्यां आभरणसमुद्गको तव हस्ते निक्षिप्तः । नाधुनान्धकारः । पुनरपि तं मम देहि । भगवान्भानुरुदियाय । नाधुना भयम् । इति तमतीव निर्बबन्ध ॥

किमेतत्सत्यम् ? किं रात्र्यां मम हस्ते स निक्षिप्तः । इदं मम प्रियं यच्चोरेण आभरणान्यपहृतानि । अन्यथा कर्मान्ते दरिद्रस्य मम गृहे हर्तुं किञ्चिदप्यलब्ध्वा स चोरः मां शपन् गच्छेत्' इति अपहृतान्याभरणानि निर्धार्य चारुदत्तोऽतीव मुमुदे । यदा मैत्रेयः तानि परकीयानीति स्मारयामास तदायं मोहमुगतः । प्रतिबुध्य, 'भूतार्थं कः श्रद्धास्यति ? सर्वो मां तुलयिष्यति । शङ्कनीया हि दोषेषु निष्प्रतापा दरिद्रता । इति स चिखिदे ॥

तच्छ्रुत्वा सती धूता चिन्तयामास । भाग्यपरिवृत्या पतिरधुनाकिञ्चनः । केनाहं पतिमनृणं कुर्याम् ? इदं माङ्गल्यम् । इमे ताटङ्के । नान्यत्किञ्चिदत्र वर्तते । किं करोमि मन्दभाग्या इति प्रलपन्ती मुमूर्छ । प्रतिबुध्य ज्ञातिकुले दत्तां मुक्तावलीं संस्मृत्य 'दत्तामपि तां शौण्डीरतया न प्रतीच्छति । किं कुर्यामि'ति सञ्चिन्त्य, विदूषकमानाय्य

' व्रतस्य अन्ते किञ्चिदर्घ्यं वस्तु देयं ब्राह्मणाय। प्रतीच्छेमाम् '। इत्युक्त्वा मुक्ताहारं तस्याददात्। अवस्थाविरुद्धं दानविभवं विचार्य तमादातुं स नानुमेने। तदा कर्तव्यं चेटी तं बोधयामास। हृष्टस्सः तदनन्तरं तां प्रतिजग्राह। चारुदत्तस्यान्तिकं आगत्य मुक्ताहारं तस्मै प्रदर्श्य तस्या अभिप्रायं तमबोधयत्। स्त्रीधनेन अनुकम्पितां स्वां दशां स्मृत्वा चारुदत्त अतीवाखिद्यत। गत्यन्तराभावात्तामादाय विदूषकमेव वसन्तसेनायाः स्सकाशं तं प्रेषयामास दिदेश च तं—' सखे! न्यासभूतान्याभरणानि स्वीयानीति कृत्वा द्यूते हारितानि। तेभ्यः प्रति इमां प्रतीच्छेति ' वसन्तसेनास्मद्वचनाद्वाच्या इति॥

अल्पमूल्येभ्यः आभरणेभ्यः अनर्घा मुक्तावली समुद्रपत्तनसारभूता दातव्या आसीदिति खिन्नोऽपि विदूषकः ' मूढ! अल्पमूल्येभ्यः आभरणेभ्यः प्रति एषा न दीयते। अपि तु तया मयि कृतस्य विश्वासस्य इयं मूल्यं दीयते ' इति तं सान्त्वयित्वा प्रेषितः॥

आगताद्विदूषकान्मुक्तावलीं स्वीकृत्य शर्विलकेन दत्तान्येवाभरणानि धृत्वा चेट्या साकं स्वाद्गृहान्निर्गत्य गुणेभ्यः परवशा चारुदत्तगृहमागत्य सा तं वव्रे। सुखेन तौ तस्मिन्नगरे बहूनि दिनानि ऊषतुः॥

टिप्पणी.

गुरूपदेशः.

पुटम्. संख्या.

1 1 **वेदः—ऋग्यजुस्साम अथर्वण** ಗಳೆಂದು ವೇದಗಳು ನಾಲ್ಕು. ಇವು ಹಿಂದೂಮತಗ್ರಂಥಗಳು. ಸಂಹಿತೆ, ಕರ್ಮಕಾಂಡ, ಜ್ಞಾನಕಾಂಡ ಗಳೆಂದು ಮೂರು ಭಾಗಗಳನ್ನು ಪ್ರತಿಯೊಂದು ವೇದವೂ ಹೊಂದಿರುತ್ತದೆ. ದೇವತಾಸ್ತುತಿಗಳು ಸಂಹಿತೆಯಲ್ಲಿಯೂ, ಯಜ್ಞಯಾಗಾದಿ ಕರ್ಮಗಳು ಕರ್ಮಕಾಂಡದಲ್ಲಿಯೂ, ಉಪನಿಷತ್ ಅಥವಾ ಜ್ಞಾನ ಕಾಂಡದಲ್ಲಿ ಮೋಕ್ಷ, ಆತ್ಮ ಮೊದಲಾದ ವಿಚಾರಗಳೂ ಹೇಳಲ್ಪಟ್ಟಿವೆ.

1 2 **अनूच्य—अनु+वच्+ल्यप्. व** ಕಾರಕ್ಕೆ ಉಕಾರಾದೇಶ. ಇದಕ್ಕೆ ಸಂಪ್ರಸಾರಣವೆಂದು ಹೆಸರು. **य, र, ल, व** ಇವುಗಳಿಗೆ ಕ್ರಮವಾಗಿ **इ, ऋ, ऌ, उ** ಇವು ಆದೇಶವಾಗಿ ಬರುವುದು ಸಂಪ್ರಸಾರಣ.

अनु+उच्+य=अनूच्य ಗುರುವು ಹೇಳುವಂತೆ ವೇದದ ಆನುಪೂರ್ವಿಯನ್ನು ಹೇಳುವುದು ಅನುವಚನ.

1 3 **अन्ते वसति इति=अन्तेवासी.** ಅಲುಗ್ವೃತ್ತಿ. ಸಪ್ತಮೀ ವಿಭಕ್ತಿಗೆ ಲೋಪವು ಬಂದಿಲ್ಲ. ನಿರ್ಣಯದಲ್ಲಿರುವವನು. ವಿದ್ಯೆಯು ಮುಗಿಯುವವರೆಗೂ ಗುರುವು ಹೇಳಿದಂತೆ ನಿಯಮಗಳನ್ನನುಸರಿಸಿ ದೃಢಸಂಕಲ್ಪನಾಗಿ ಗುರುಕುಲವಾಸಮಾಡುವ ಶಿಷ್ಯ.

1 4 **अनु+शास्+लट्. 2 स. प.** ವರ್ತಮಾನಕಾಲ.

1 5 **प्रमदः—न माङ्योगे** ಎಂದು ಇಲ್ಲಿ **अट्** ಎಂಬ ಆಗಮ ಬಂದಿಲ್ಲ. ಇದು ನಾಲ್ಕನೆಯ ಗಣ. **य** ಎಂಬುದು ವಿಕರಣಪ್ರತ್ಯಯ ಬರಬೇಕು. **लुङ्** ರೂಪ. **म. ए.**

1 6 **आचार्याय**=ಮಂತ್ರವ್ಯಾಖ್ಯಾನಮಾಡುವನಿಗೆ.

1 7 **व्यवच्छेत्सीः—वि+अव+छिद् भिदादि** ಗಣ. **श्नम्** ವಿಕರಣ ಪ್ರತ್ಯಯ: ಧಾತುವಿನ ಕೊನೆಯ ಸ್ವರದ ಮುಂದೆ **न** ಎಂಬ ವಿಕರಣಪ್ರತ್ಯಯವು ಸಾರ್ವಧಾತುಕ ರೂಪದಲ್ಲಿ ಬರುತ್ತದೆ. **छि+न+द्+ति= छिनत्ति** ಎಂದು ರೂಪ. **मा** ಎಂಬುದರ ಸಂಬಂಧವಿರುವುದರಿಂದ ಇಲ್ಲಿಯೂ **अट्** ಆಗಮ ಬಂದಿಲ್ಲ. ಇದು ಬಂದಿದ್ದರೆ **व्यवाच्छेत्सीः** ಎಂದು ಧಾತುರೂಪವಿರಬೇಕು. **प. स. लुङ्. म. डा.**

पुटम्. सख्या.

1 8 **सत्यं न तत्सत्यं यच्छलमभ्युपैति** ಎಂದು ವಿದುರನೀತಿ. ಮೋಸದ ಸಂಬಂಧವಿಲ್ಲದುದು ಸತ್ಯ.

1 9 **धर्मः ध्रियते अनेन,** ಅಥವಾ **धरति इति**—ಪ್ರಪಂಚಧಾರಣಕ್ಕೆ ಯಾವುದು ಮೂಲವೋ ಅದು ಧರ್ಮ. **न सो धर्मः यत्र न सत्यमस्ति** ಎಂದು ವಿದುರನೀತಿ. ಸತ್ಯವು ಎಲ್ಲಿ ಇಲ್ಲವೋ ಅದು ಧರ್ಮವಲ್ಲ.

1 10 **माता+देवो यस्य सः (ब. स.)** ಸಮಾನಾಧಿಕರಣಬಹುವ್ರೀಹಿ. ತಾಯಿಯೇ ದೇವತೆಯಾಗಿ ಉಳ್ಳವನು. ಹೀಗೆಯೇ ಮುಂದೆಯೂ ವಿಗ್ರಹಗಳು.

1 11 **अनवद्यानि—न+अवद्यानि=अनवद्यानि. न+वद्यानि=अवद्यानि. नञ्** ತತ್ಪುರುಷ. **वद्यानि**=ಸ್ತೋತ್ರಾರ್ಹಗಳು. **अवद्यानि**=ಹೊಗಳಲ್ಪಡದವುಗಳು (ದುಷ್ಟಗಳು). **अनवद्यानि**=ದುಷ್ಟಗಳಲ್ಲದವುಗಳು (ಸ್ತೋತ್ರಾರ್ಹಗಳು) ಎರಡು ನಿಷೇಧಗಳು ಧೃಡತರವಾಗಿ ಭಾವಬೋಧಕಗಳು. (two negativesmake an afermative).

1 12 **चिचिकित्सा**=ಸಂಶಯ.

[N.B.—ಉದಾತ್ತಾನುದಾತ್ತಸ್ವರಿತಗಳೆಂದು ವೇದಗಳಲ್ಲಿ ಸ್ವರಗಳಿರುತ್ತವೆ. ಈ ಸ್ವರಗಳೊಡನೆ ಕೂಡಿಯೇ ವೇದದ ಪದಗಳನ್ನು ಉಚ್ಚರಿಸಬೇಕು **उच्चैरुदात्तः। नीचैरनुदात्तः। समाहारः स्वरितः।** ಎಂದು ಪಾಣಿನಿಯು ಇವುಗಳ ಲಕ್ಷಣಗಳನ್ನು ಹೇಳುತ್ತಾರೆ. ಎತ್ತರಿಸಿ ಹೇಳುವುದು, ತಗ್ಗಿಸಿ ಹೇಳುವುದು, ಮಧ್ಯಮಗತಿಯಲ್ಲಿ ಹೇಳುವುದು ಎಂದು ಇವುಗಳಿಗೆ ಅರ್ಥ. ಇವುಗಳನ್ನು ಬಿಟ್ಟು ಹೇಳಿದರೆ ಅಪಸ್ವರವೆನಿಸುತ್ತದೆ. ಅಪಸ್ವರವಾಗಿ ವೇದವನ್ನು ಹೇಳುವುದು ಪಾಪವನ್ನುಂಟುಮಾಡುತ್ತದೆ ಎಂದು ಹಿಂದುಗಳ ಭಾವನೆ. ಈ ಸ್ವರಗಳಿಂದ ಅರ್ಥಗಳು ವ್ಯತ್ಯಾಸವಾಗುತ್ತವೆ. ವ್ಯವಹಾರದ ಭಾಷೆಯಲ್ಲಿಯೂ ಹೀಗೆಯೇ ಸ್ವರಗಳೊಡನೆ ಕೂಡಿಯೇ ಶಬ್ದಗಳ ಉಚ್ಚಾರವಿತ್ತೆಂದೂ ಈಚೆಗೆ ಅದು ತಪ್ಪಿಹೋಗಿದೆಯೆಂದೂ ಹೇಳುತ್ತಾರೆ.

ವೇದವು ಅನಾದಿ ಅಪೌರುಷೇಯುಗಳೆಂದು ಹಿಂದುಗಳ ಭಾವನೆ. ವೇದದಲ್ಲಿಯೇ **एतन्महाभूतस्य निश्वासितम्** ಎಂದು ಇರುವುದರಿಂದ ಭಗವಂತನಿಂದ ಇದು ಲೀಲೆಯಿಂದ ಉಚ್ಚರಿಸಲ್ಪಟ್ಟುದು. ಅವನಿಂದ ಮಾಡಲ್ಪಟ್ಟುದಲ್ಲ ಎಂದೂ ಇವರ ಭಾವನೆ.]

उमामहेश्वरलीला.

पुटम्. संख्या.

6 1 पर+पर सुट् ಆಗಮ. पर+स+पर = परस्पर = ಅನ್ಯೋನ್ಯ.

6 2 माता च + पिता च = मातापितरौ. } ದ್ವಂದ್ವಸಮಾಸ.

6 3 जाया च + पतिश्च = जायापती.

6 4 अक्ष्णोः समीपे = समक्षम् — ಅವ್ಯಯೀಭಾವ. ಕಣ್ಣಿಳಮುಂದೆ.

6 5 पिनाकः अस्य अस्ति इति पिनाकी — ಈಶ್ವರ. त. वृ.

6 6 निन्द् 1 स. प. लिट् — (ಪೂರ್ಣಭೂತ).

6 7 पर्वतस्य अपत्यं स्त्री = पार्वती. त. वृ. ಪರ್ವತನ ಮಗಳು.

6 8 सुभगायाः भावः = सौभाग्यं. त. वृ. ಹೆಂಡತಿಯಲ್ಲಿ ಗಂಡನು ಮಾಡುವ ಪ್ರೀತಿ.

6 9 इयेष—1 स. प. लिट् (ಪೂರ್ಣಭೂತ) ಇಚ್ಛಿಸಿದಳು.

6 10 अवन्ध्यरूपताम् न वन्ध्यं = अवन्ध्यं तत् + रूपं यस्यास्सा — अवन्ध्यरूपा. नञ् ತತ್ಪುರುಷ. ಬಹುವ್ರೀಹಿ. तस्याः भावः = अवन्ध्यरूपता, ताम्. त. वृ. ವ್ಯರ್ಥವಲ್ಲದ ರೂಪವುಳ್ಳವಳ ಭಾವವನ್ನು.

6 11 समाधिः—(पुम्) ಧ್ಯಾನಧ್ಯೇಯಗಳ ಅಭೇದಾವಸ್ಥೆ.

6 12 आ + स्था + ल्यप् = आस्थाय ಹೊಂದಿ.

6 13 उवाच—वच्. 2 प. स. लिट् = ಹೇಳಿದಳು.

6 14 मनीषिताः—मनसः ईषिताः = मनीषिताः प. त. ಶಕಂಧ್ವಾದಿ ಗಣದಲ್ಲಿ ಸೇರಿರುವುದರಿಂದ ಪೂರ್ವಪದದ टि ಎಂಬ ಭಾಗಕ್ಕೂ ಉತ್ತರ ಪದದ ಆದಿಸ್ವರಕ್ಕೂ ಪರರೂಪಾದೇಶ. मन् + अस् (टि) + ईषिताः = मन् + ईषिताः = मनीषिताः.

6 15 तावकं—तव + इदं = ನಿನಗೆ ಸಂಬಂಧಪಟ್ಟ. 'तवकममकावेकवचने' ಎಂದು ಇಲ್ಲಿ युष्मत् ಶಬ್ದಕ್ಕೆ ತದ್ಧಿತಪ್ರತ್ಯಯವು ಮುಂದಿರುವಾಗ तवक ಎಂಬ ಆದೇಶವು ಬರುತ್ತದೆ.

6 16 शिरीषपुष्पम् = ಬಾಗೆಯ ಹೂವು.

6 17 पतनात् त्रायते इति पतत्रं = ರೆಕ್ಕೆ. उ. प. पतत्रे अस्य स्तः इति पतत्री = पतत्र + इन्. त. वृ.

6 18 ध्रुवा + इच्छा यस्यास्सा = ध्रुवेच्छा. स. ब. ಸ್ಥಿರವಾದ ಬಯಕೆಯುಳ್ಳ.

पुटम्. संख्या.

6 19 अनु+शास्+शतृ=अनु+शास्+अत्. 'जक्षत्यादयः षट्' ಎಂದು नुम् ಎಂಬ ಆಗಮವಿಲ್ಲ. अनुशासत् (स्त्री) अनुशासती ಉಪದೇಶಿಸುವವಳಾಗಿ.

6 20 शशाक—शक्. 5 अ. प. लिट्. प्र. ए. ಶಕ್ತಳಾದಳು.

6 21 आप्तुमिष्टः—ईप्सितः. आप्+सन्+क्त=ईप्सितः. ಬಯಸಲ್ಪಟ್ಟ.

6 22 निम्नं=ಹಳ್ಳ.

6 23 प्रति+आप्+णिच्+विधिलिङ्. ಹಿಂತಿರುಗಿಸಿಯಾರು.

6 24 अभिनिवेशः—अभि+नि+विश्+घञ्. ಸಂಕಲ್ಪ (ಇಚ್ಛೆ).

6 25 कृता+अनुज्ञा यस्यै सा=कृताभ्यनुज्ञा. ಕೊಡಲ್ಪಟ್ಟ ಅಪ್ಪಣೆಯುಳ್ಳವಳು. स. ब.

6 26 अत्यन्तं गुरुः=गरीयान् त. वृ. गरु+ईयस्—ಹೆಚ್ಚಾಗಿ ದೊಡ್ಡವನಾದ.

6 27 जगाम—गम्. अ. प. लिट्. ಹೋದಳು. ಸಂಸ್ಕೃತಧಾತುಗಳ ಮೇಲೂ ಇಂಗ್ಲೀಷ್‌ಭಾಷೆಯಲ್ಲಿರುವಂತೆ ಧಾತುರೂಪದಲ್ಲಿ ಲಿಂಗಕ್ಕೆ ಸಂಬಂಧಿಸಿದ ಬದಲಾವಣೆಯಿಲ್ಲ. ಕನ್ನಡದಲ್ಲಿ ಇದು ಉಂಟು.

6 28 शिखण्डिमत्—शिखण्डः एषां अस्ति इति शिखण्डिनः, त. वृ. ನವಿಲುಗಳು. शिखण्डिनः अस्मिन् सन्ति इति शिखण्डिमत्—ನವಿಲುಗಳುಳ್ಳದು. त. वृ.

7 29 षट्पद—षट्+पदानि एषां ते=षट्पदाः=ಆರು ಕಾಲುಳ್ಳ ದುಂಬಿಗಳು (स. ब).

7 30 पङ्कजं (न.)—पंङ्के जायते इति—ಯೋಗರೂಢ. ಕೆಸರಿನಲ್ಲಿ ಹುಟ್ಟಿದ ಕಮಲ.

7 31 शैवाल (न.)=ಪಾಚಿ.

7 32 प्रतिक्षणम्=क्षणे क्षणे, वीप्सायां ಅವ್ಯಯೀಭಾವಃ. ಪ್ರತಿಯೊಂದು ಕ್ಷಣದಲ್ಲಿಯೂ.

7 33 त्रयः+गुणाः यस्यासा=त्रिगुणा (स. ब.) ಮೂರು ಹುರಿಯುಳ್ಳ (ಮುಪ್ಪುರಿಯಾದ).

7 34 बभार—भृ. 1 स. प. लिट् प्र. ए. ಧರಿಸಿದಳು. (कर्तरि) ಧಾರಣಪೋಷಣಾರ್ಥಕ.

7 35 अशेत—शी. 2 अ. आ. लङ्. प्र. ए. ಮಲಗಿದಳು.

7 36 उपधायिनी=ತಲೆದಿಂಬನ್ನಾಗಿ ಹೊಂದಿದವಳು.

पुटम्. संख्या.

7 37 **स्थण्डिले**—ನೆಲದಲ್ಲಿ.

7 38 **जातं वेत्ति इति जातवेदाः.** **स**ಕಾರಾಂತ. ಹುಟ್ಟಿದವನನ್ನು ತಿಳಿ ಯುವವನು. ಅಗ್ನಿ.

7 39 **उत्तरासङ्गवती**—ಮೇಲ್ಹೊದಿಕೆಯನ್ನಾಗಿ ಹೊಂದಿದವಳು.
उत्तरासङ्गः—प्रावारः = ಮೇಲೆ ಇರುವ ಹೊದಿಕೆ.

7 40 **दिदृक्षवः—द्रष्टुमिच्छवः**—ನೋಡಲು ಬಯಕೆಯುಳ್ಳವರು. **दृश्** ಧಾತುವಿನ ಸನ್ನಂತವಿಶೇಷಣ.

7 41 **अभ्युपागमन्—अभि+उप+अगमन्**—
[N.B.—**अद्** ಎಂಬ ಆಗಮವು ಧಾತುವಿಗೆ ಭೂತಕಾಲದಲ್ಲಿ ಎಡೆಬಿಡದೆ ಹಿಂದೆಯೇ ಬರುತ್ತದೆ. ಆದುದರಿಂದ ಎರಡು ಉಪಸರ್ಗಗಳ ಮುಂದೆ ಬಂದಿದೆ. **लुङ् अ. प. प्र. ए. (कर्तरि)**].

7 42 **समीक्ष्यते—सम्+ईक्ष्. कर्मणि लट् प्र. ए. दर्शनार्थक**—ನೋಡಲ್ಪಡುತ್ತದೆ. **कर्तरि**ಪ್ರಯೋಗ **धर्मवृद्धेषु जनाः वयः न समीक्षन्ते.**

7 43 **तत् प्रमाणमस्य तावान् तेन—तावता. त वृ.** ಆ ಪ್ರಮಾಣವುಳ್ಳ. (ಅಷ್ಟಾದ).

7 44 **अमंस्त—4 आ. स. लुङ्** (ಅದ್ಯತನಭೂತ) **प्र. ए.**

7 45 **न+अप+ईक्ष्+ल्यप्**—ನೋಡದೆ (ಗಮನಿಸದೆ).

7 46 **प्र+क्रम्—उ. आ. 1-4 लिट्** (ಪೂರ್ಣಭೂತ) **प्र. ए.** ಆರಂಭಿಸಿದಳು.

7 47 **शुचौ—(पुम्)** ಗ್ರೀಷ್ಮರ್ತುವಿನಲ್ಲಿ (ನಾಮ).

7 48 **शुचि—वि.** ಶುದ್ಧವಾದ (ಬಿಳುಪಾದ).

7 49 **ऐक्षत—ईक्ष्. 1 स. आ. लङ्.** (ಅನದ್ಯತನಭೂತ) **प्र. ए.** ನೋಡಿದಳು.

7 50 **उडूनां + पतिः = उडुपतिः, तस्य उडुपतेः—(ष. त.)** ನಕ್ಷತ್ರಗಳಿಗೆ ಒಡೆಯನ (ಚಂದ್ರನ). '**पतिः समास एव**' ಎಂದು ಹರಿ ಶಬ್ದದಂತೆ '.

7 51 **व्यलोकि—वि + लुक्. 1 आ. स. कर्मणि लुङ् प्र. ए.** ನೋಡಲ್ಪಟ್ಟಳು. **शिलाशयां तां तु निकेतनाद्बहिः व्यलोकिषत रात्र्यां तडिदीक्षणैर्घनाः** ' **कर्तरि**ಪ್ರಯೋಗ.

7 52 **सहस्यः—(पुम्)** ಹಿಮಂತರ್ತು. ಪುಷ್ಯಮಾಸ.

8 53 **काष्ठा**—ಅಂತಸ್ತು, ನಾನಾರ್ಥ (ದಿಕ್ಕು).

8 54 **सत्त्वं**—ಪ್ರಾಣಿ, ನಾನಾರ್ಥ (ಶಕ್ತಿ).

पुटम्. संख्या.

8 55 आषाढः-- (पुं.) ಮುತ್ತುಗದ ಕೋಲು (ದಂಡ).

8 56 शरीरबद्धः—बद्धं+शरीरं येन सः शरीरबद्धः. बद्धशरीरः ಎಂದೂ ಉಂಟು. स. ब. आहिताग्न्यादि ಗಣ.

8 57 अतिथिषु साधुः आतिथेयी--त. बृ. (स्त्री.)

8 58 सपर्यया—ಪೂಜೆಯಿಂದ (ಸತ್ಕಾರದಿಂದ). स्त्री. तृ.

8 59 समिधश्च कुशाश्च=समित्कुशम्. ಸಮಾಹಾರದ್ವಂದ್ವ. 'जातिरप्राणिनां' ಎಂದು ಇಲ್ಲ ಸಮಾಹಾರದ್ವಂದ್ವ.

8 60 प्रवालम्—ಚಿಗುರು (ಹವಳ).

8 61 वीरुत्—(स्त्री. धकारान्त). ಬಳ್ಳಿ.

8 62 यदुच्यते 'पार्वति! पापवृत्तये न रूपम्' कर्मणि.
यदभियुक्तो वक्ति 'पार्वति पापवृत्तये न रूपम्' इति कर्तरि. वच् ಧಾತುವಿಗೆ ಬಹುವಚನದ ರೂಪವು ಪ್ರಯೋಗದಲ್ಲಿಲ್ಲ. (ವರ್ತಮಾನಕಾಲದಲ್ಲಿ)

9 63 त्रिवर्गः (पुं.) ಧರ್ಮಾರ್ಥಕಾಮಗಳು (ಮೂರರ ಗುಂಪು).

9 64 मनीषा एषामस्ति इति मनीषिणः तैः—ಬುದ್ಧಿವಂತರಿಂದ.

9 65 सप्तभिः पदैः साध्यं साप्तपदीनम्=सख्यम्—ಸ್ನೇಹ. ದ್ವಿಗು ಮತ್ತು त. बृ.

9 66 प्रष्टुम्+मनः यस्य सः प्रष्टुमनाः ब. व्री. तुंकाममनसोरपि ಎಂದು तुं ಅಂತವಾದ ಪದದ ಮುಂದೆ काम ಮತ್ತು मनस् ಶಬ್ದಗಳು ಉತ್ತರಪದಗಳಾಗಿ ಬಂದಾಗ म् ಕಾರಕ್ಕೆ ಲೋಪವು ಬರುತ್ತದೆ.

9 67 ईश्वरस्य भावः=ऐश्वर्यम्—त. बृ. ऐश्वर्यात् सुखं—ऐश्वर्यसुखं. पं. त. ಸಂಪತ್ತಿನಿಂದುಂಟಾಗುವ ಸುಖ.

9 68 प्रशस्तं मनः आसां अस्तीति=मनस्विन्यः. ದೃಢಸಂಕಲ್ಪವುಳ್ಳ ಹೆಂಗುಸರು.

9 69 प्रतिपद्यते अनेन इति प्रतिपत्तिः—करणार्थದಲ್ಲಿ क्तिन् ಪ್ರತ್ಯಯ. ದೃಢಸಂಕಲ್ಪ.

9 70 इमामिव पश्यति अथवा इयमिव दृश्यते इति ईदृशी — ಇಂತಹ.

9 71 न दृश्यते तत्—कर्मणि ಪ್ರಯೋಗ. ಅದು ಕಾಣಲ್ಪಡುವುದಿಲ್ಲ.
न पश्यामि तत्—कर्तरि ಪ್ರಯೋಗ. ಅದನ್ನು ನಾನು ಕಾಣುವುದಿಲ್ಲ.

9 72 शोभने भ्रुवौ यस्यास्सा=सुभ्रूः. तस्याः संबुद्धिः हे सुभ्रु. ಒಳ್ಳೆಯ ಹುಬ್ಬುಳ್ಳವಳೇ! ಸ್ಥಾಲೀಪುಲಾಕನ್ಯಾಯದಿಂದ ಅಂದವಾಗಿರುವವಳೇ ಎಂದರ್ಥ ಸುಂದರಿಯೇ!)

पुटम्. संख्या.

9 73 प्र+सृ ಗತ್ಯರ್ಥ. अ. ಈಗ ನೀಡುವುದು ಎಂದರ್ಥ.—(णिजन्त) ಪ್ರೇರಣಾರ್ಥಕ. विधिलिङ् प्र. ए.

9 74 पन्नगः— पद्भ्यां न गच्छतीति पन्नगः. उ. प. स. ಕಾಲಿನಿಂದ ನಡೆಯದ. ಹಾವಿಗೆ ಕಾಲಿಲ್ಲದುದರಿಂದ ಎದೆಯಲ್ಲಿ ತೆವಳುವುದರಿಂದ पन्नग, उरग ಎಂಬ योगरूढ ಪದಗಳು ಪ್ರಯೋಗದಲ್ಲಿವೆ.

9 75 युवत्याः भावः यौवनम्—त. वृ. ಪ್ರಾಯ (ಹರೆಯ).

9 76 वार्धिकं—वृद्धानां भावः वार्धकम्. त. वृ. ಮುಪ್ಪು. ಮುದುಕರ ಗುಂಪು.

9 77 प्रदोषः—ರಾತ್ರಿಯ ಆದಿಭಾಗ. सायं ಸಂಧ್ಯಾಕಾಲ.

9 78 उपयन्तारम् —ಗಂಡನನ್ನು (ಮದುವೆ ಮಾಡಿಕೊಳ್ಳುವ ಗಂಡುಸನ್ನು).

9 79 न मृग्यते हि तत्—कर्मणिಪ್ರಯೋಗ. ಅದು ಹುಡುಕಲ್ಪಡುವುದಿಲ್ಲ. न मृगयते तत्—कर्तरि ಪ್ರಯೋಗ. ಅದನ್ನು ಹುಡುಕುವುದಿಲ್ಲ. मृग्. 10 आ. स. लट् प्र. ए. कर्मणि.

10 80 आप्तुं इष्टः = ईप्सितः. सन्नन्तविशेषण. ಹೊಂದಲು ಇಷ್ಟವಾದ

10 81 उप+इक्षते—ईक्ष् 1 आ. स. लट् प्र. ए. ಉದಾಸೀನಮಾಡುತ್ತಾನೆ.

10 82 पिङ्गलाः—ಹೊಂಬಣ್ಣವುಳ್ಳ.

10 83 अव+एमि=इण् ಗತ್ಯರ್ಥಕ. ಇಲ್ಲಿ ಜ್ಞಾನಾರ್ಥಕ. स. प. ल. उ. ए. ತಿಳಿಯುತ್ತೇನೆ.

10 84 आत्मीयम्—आत्मनः+इदं=आत्मीयम्—त. वृ. ತನಗೆ ಸಂಬಂಧಪಟ್ಟ.

10 85 अरालपक्ष्मणः—अरालानि पक्ष्माणि यस्य तत्—अराल-पक्ष्म, तस्य. स. ब. ವಕ್ರಗಳಾದ ರೆಪ್ಪೆಯ ಕೂದಲುಗಳುಳ್ಳ.

10 86 नैष्ठिकः=ಆಜೀವಬ್ರಹ್ಮಚಾರಿ.

11 87 वर्णी=ಬ್ರಹ್ಮಚಾರಿ.

11 88 कौतुकम्—ಪ್ರತಿಸರ=ಕಂಕಣ.

12 89 विडम्बना—ಹಾಸ್ಯ.

12 90 वारणराजहार्यया—वारणानां राजा (ष. त.)=वारणराजः हर्तुं योग्या हार्या. कृ. वृ. तेन हार्या वारणराजहार्या तया. तृ. त. ಉತ್ಕೃಷ್ಟವಾದ ಆನೆಯಿಂದ ಒಯ್ಯಲ್ಪಡಲು ಯೋಗ್ಯವಾದ. ಒಳ್ಳೆಯ ಆನೆಯಮೇಲೆ ಮೆರವಣಿಗೆಗೆ ತಕ್ಕವಳಾದ.

12 91 वृद्धश्चासौ उक्षा च=वृद्धोक्षः–क. धा. ಮುದಿ ಎತ್ತು. 'अचतुर-विचतुर' ಇದರಿಂದ अजन्त.

पुटम्. संख्या.

21 92 **महाजनः**—ಸಾಧುಜನರು. ಇಲ್ಲಿ ಜನಶಬ್ದವು ಸಮುದಾಯಾರ್ಥಕ. ಸಜ್ಜನರ ಗುಂಪು ಎಂದರ್ಥ.

12 93 **कपालिनः—कपालः + अस्य अस्ति इति कपाली, तस्य इन्नन्त त. वृ.** ಕಪಾಲವನ್ನು ಭಿಕ್ಷಾಪಾತ್ರವನ್ನಾಗಿ ಉಳ್ಳವನು.

12 94 **कलाः अस्य सन्ति इति कलावान्.** ಹದಿನಾರು ಕಲೆಗಳನ್ನು ಉಳ್ಳವನು. ಪ್ರಶಸ್ತಾರ್ಥದಲ್ಲಿ **मतुप्** ಚಂದ್ರ **त. वृ.**

12 95 **वसु**—ದ್ರವ್ಯ (**न**) ಪುಲ್ಲಿಂಗವಾದರೆ ಎಂಟುಜನ ವಸುಗಳೆಂಬ ದೇವತೆಗಳು. ಇಂದ್ರಲೋಕನಿವಾಸಿಗಳು.

12 96 **बालश्चासौ मृगश्च—बालमृगः क. स. तस्य अक्षिणी इव अक्षिणी यस्यास्या बालमृगाक्षी स. ब. तस्याः संबुद्धिः बालमृगाक्षि.** ಜಿಂಕೆಯ ಮರಿಯ ಕಣ್ಣಿನೋಪಾದಿಯಲ್ಲಿ ಕಣ್ಣುಳ್ಳ ಹೆಂಗುಸು. ಹೆಚ್ಚು ಚಾಂಚಲ್ಯದೊಡನೆ ಕೂಡಿದ ಕಣ್ಣುಳ್ಳವಳು.

12 97 **त्रीणि लोचनानि यस्य सः त्रिलोचनः.** ಮೂರು ಕಣ್ಣುಳ್ಳವನು, ಈಶ್ವರ. ವಿರೂಪನಾಗಿರುವವನು ಎಂದು ಭಾವ. **स. ब.**

12 98 **निवर्तय—नि + वृत् + णिट् लोट् म. ए.** ಹಿಂದಿರುಗಿಸು.

12 99 **सा + विधा यस्य सः.** ಆಪ್ರಕಾರವುಳ್ಳವನು. ವಿರೂಪ, ಅಜ್ಞಾತ ಕುಲಗೋತ್ರ, ದರಿದ್ರ, ಅಮಂಗಲಾಭ್ಯಾಸರುಚಿ ಎಂದು ಭಾವ. **स. ब.**

12 100 **वैदिकी**—ವೇದದಲ್ಲಿ ಹೇಳಲ್ಪಟ್ಟ.

12 101 **यूपसत्क्रिया**—ಯೂಪಸ್ತಂಭಕ್ಕೆ ಸಲ್ಲುವ ಪೂಜೆ. ಯಜ್ಞದಲ್ಲಿ ಪಶುವನ್ನು ಕಟ್ಟುವ ಕಂಬವು ಯೂಪ. **यूपस्य सत्क्रिया ष. त.**

12 102 **प्रतिकूलवादिनि—प्रतिकूलं वदति इति प्रतिकूलवादी, तस्मिन् = प्रतिकूलवादिनि.** ವಿರುದ್ಧವಾಗಿ ಮಾತಾಡಲು.

[N.B.—**द्विजातौ प्रतिकूलवादिनि**—ಬ್ರಾಹ್ಮಣನು ವಿರುದ್ಧವಾಗಿ ಮಾತಾಡಲು, ಸತಿಸಪ್ತಮಿಪ್ರಯೋಗ. ಕೃದಂತವಿಶೇಷಣ ಮತ್ತು ವಿಶೇಷ್ಯಗಳು ಸಪ್ತಮ್ಯಂತಗಳಾಗಿದ್ದು ಪ್ರಥಮಾಂತದ ಅರ್ಥವನ್ನು ಕೊಡುವ ಪ್ರಯೋಗ. ಭಾವಲಕ್ಷಣಸಪ್ತಮಿ ಯೆಂದೂ ಇದಕ್ಕೆ ಹೆಸರು. ಒಂದು ಕ್ರಿಯೆಯು ಮತ್ತೊಂದು ಕ್ರಿಯೆಯ ಕಾಲವನ್ನು ಗೊತ್ತುಮಾಡುವುದು ಭಾವಲಕ್ಷಣ. ಇಲ್ಲಿ ವಾಕ್ಯದಲ್ಲಿ ಪ್ರಧಾನವಾದ ಕ್ರಿಯೆಯಾದ ಕಡೆಗಣ್ಣಿನಲ್ಲಿ ಕೆಂಪಾದ ಕಣ್ಣನ್ನಿಡುವಿಕೆಯೆಂಬ ಕ್ರಿಯೆಯು ವಿರುದ್ಧಭಾಷಣ ವೆಂಬ ಕ್ರಿಯೆಯೂ ಒಂದು ಕಾಲದಲ್ಲಿ ಆಯಿತು ಎಂದು ಇಲ್ಲಿ ಗೊತ್ತಾಗುತ್ತದೆ. (Nominative absolute ಪ್ರಯೋಗ. Day dawning, we arose ಎಂಬಂತೆ.)

पुटम्. संख्या.

12 103 विकुञ्चितभ्रूलतं—भ्रुवौ लते इव भ्रूलते ಉಪಮಾನೋತ್ತರ ಪದ ಕರ್ಮಧಾರಯ विकुञ्चिते भ्रूलते यस्मिन् कर्मणि तद्यथा भवति तथा. ಸೊಟ್ಟಗೆ ಮಾಡಿದ ಲತೆಯಂತಿರುವ ಹುಬ್ಬುಗಳು ಯಾವ ಕೆಲಸದಲ್ಲಿಯೋ ಅಂತಹ ಕೆಲಸ. ಕ್ರಿ. ವಿ.

12 104 वेत्सि—विद्—2 स. प. लट् म. ए. ತಿಳಿಯುತ್ತೀಯೆ.

12 105 आत्थ—ब्रुव्—2 स. प. लट् म. ए. ब्रुव्—ಧಾತುವಿಗೆ ವರ್ತಮಾನಕಾಲದಲ್ಲಿ ಮೊದಲೈದು ವಚನಗಳಲ್ಲಿ ಪ್ರ-ಪುರುಷದ ಮೂರು ರೂಪ ಮಧ್ಯಮ ಪುರುಷದ ಏಕದ್ವಿವಚನಗಳಲ್ಲಿ आह ಎಂಬ ಆದೇಶವು ಬರುತ್ತದೆ. ಹೇಳುತ್ತೀಯೆ.

12 106 द्विषन्ति—2 स. प. प्र. ब. ದ್ವೇಷಿಸುತ್ತಾರೆ.

13 107 अकिञ्चनः—न विद्यते किञ्चन यस्य सः अकिञ्चनः स. ब. ಏನೂ ಇಲ್ಲದವನು ದರಿದ್ರ.

13 108 त्रयाणां लोकानां समाहारः त्रिलोकम् ಅಥವಾ त्रिलोकी स. द्वि. ಮೂರುಲೋಕಗಳ ಗುಂಪು. त्रयाणां लोकानां नाथः (पूर्वपदपदाद्विगु स.)

13 109 पितॄणां सद्म पितृसद्म—ಪಿತೃಗಳ ವಾಸಸ್ಥಳ (ಶ್ಮಶಾನ.) ष. त.

13 110 आत्मानं अनतिक्रम्य यथात्म, तस्य भावः याथात्म्यं ಸ್ವಭಾವವನ್ನತಿಕ್ರಮಿಸದ ಭಾವವನ್ನು (ನಿಜಾಂಶವನ್ನು). ಇಲ್ಲಿ याथार्थ्य ಎಂದೂ ಮತ್ತೊಂದು ಪಾಠವುಂಟು. अर्थमनतिक्रम्य यथार्थ, तस्य भावः—ನಿಜಾಂಶ.

13 111 भोगः अस्य अस्ति इति भोगी त. वृ. ಹಾವಿನ ಶರೀರ ಭೋಗ. ಅದುಳ್ಳದ್ದು ಹಾವು. पिनद्धः भोगी यस्मिन् तत्, स. ब. पिनद्धभोगि = ಕಟ್ಟಲ್ಪಟ್ಟ ಹಾವುಳ್ಳುದು. अव ಮತ್ತು अपि ಎಂಬ ಉಪಸರ್ಗಗಳ अ ಕಾರವು ವಿಕಲ್ಪವಾಗಿ ಲೋಪವನ್ನು ಹೊಂದುತ್ತದೆ. अपिनद्ध = पिनद्ध.

13 112 अवधार्यते—अव ಉಪಸರ್ಗದ ಶಕ್ತಿಯಿಂದ धृ ಧಾತುವಿಗೆ ಗೊತ್ತುಮಾಡುವುದು ನಿರ್ಣಯಿಸುವುದು ಎಂಬ ಅದರಲ್ಲಿ ಅಡಗಿರುವ ಅರ್ಥಾಂತರವು ತೋರುತ್ತದೆ. 1 स. प. कर्मणि लट् प्र. ए. कर्तरि ಪ್ರಯೋಗದ 1 स. प. कर्तणि लट् प्र. ए. अवधारयति.

13 113 विलिप्यते मौलिभिरम्बरौकसाम् चिताभस्मरजः कर्मणि-प्रयोगः ದೇವತೆಗಳ ತಲೆಗಳಿಂದ ಬಳಿದುಕೊಳ್ಳಲ್ಪಡುತ್ತದೆ. विलिम्पन्ति अम्बरौकसां मौलयः चिताभस्म. ಚಿತೆಯ ಬೂದಿ

पुटम्. संख्या.

ಯನ್ನು ದೇವತೆಗಳ ತಲೆಗಳು ಬಳಿದುಕೊಳ್ಳುತ್ತವೆ. **अम्बरं + ओकः येषां ते अम्बरौकसः.** ಆಕಾಶವೇ (ಸ್ವರ್ಗವೇ) ವಾಸಸ್ಥಳವಾಗಿ ಉಳ್ಳವರು (ದೇವತೆಗಳು). **ओकस् स** ಕಾರಾಂತನಪುಂಸಕ, **तेषां अम्बरौकसाम्.**

13 114 **वचनीयं**—ದೋಷವನ್ನು.

13 115 **न ईक्षते**—ಲಕ್ಷ್ಯಮಾಡುವುದಿಲ್ಲ.

13 116 **निवार्यतां—नि. वृ. णिच् कर्मणि लोट् (आज्ञार्थक) म. ए.** ತಡೆಯಲ್ಪಡಲಿ. **निवारय (कर्तरि).**

13 117 **विवक्तुमिच्छुः—विवक्षुः वि + वच् सन्नन्तात् उप्रत्ययः कृ. वृ.** ಮಾತಾಡಲಿಚ್ಛೆಯುಳ್ಳವನು.

13 118 **महतः** = ದೊಡ್ಡವರನ್ನು **अपभाषते** = ದೂಷಿಸುತ್ತಾನೆಯೋ.

13 119 **शृणोति—श्रु + नु + ति. नु** ಇಲ್ಲಿ ವಿಕರಣ. 5 **स. प. लट् प्र. ए.** ಕೇಳುತ್ತಾನೆಯೋ.

13 120 ಹರಿಯುತ್ತಿರುವ ನದಿಗೆ ಅಡ್ಡಲಾಗಿ ಬೆಟ್ಟವು ಸಿಕ್ಕಿದರೆ ಅದು ಹೇಗೆ ಅಲ್ಲಿ ನಿಲ್ಲಲೂ ಆರದೋ ಮತ್ತು ಹೋಗಲೂ ಆರದೋ ಅದರಂತೆ ಈಶ್ವರನನ್ನು ನೋಡಿ ಪಾರ್ವತಿಯು ಹಿಂದಿರುಗಲು ಎತ್ತಿದ ಕಾಲನ್ನು ಹೊಂದಿದವಳಾಗಿ ಬೆವರಿನೊಡನೆ ಕೂಡಿದ ಕೋಲನಂತೆ ನೆಟ್ಟಗೂ ಕೃಶವಾಗಿಯೂ ಇರುವ ಶರೀರವುಳ್ಳವಳಾಗಿ, ನಡುಗುತ್ತಾ ಹಿಂದಿರುಗಿ ಹೋಗಲೂ ಅಲ್ಲಿ ನಿಲ್ಲಲೂ ಶಕ್ತಳಾಗಲಿಲ್ಲ.

14 121—

कृष्णकथारहस्यम्.

पुटम्. संख्या.

16 1 पत्ररथनाथरथाय—पत्र रथो येषां ते पत्ररथाः, तेषां नाथः स. ब. ಪಕ್ಷಿಗಳು. पत्ररथनाथः ಪಕ್ಷಿಗಳ ಒಡೆಯ—(ಗರುಡ). सः रथः यस्य सः—ಗರುಡವಾಹನನಿಗೆ (ವಿಷ್ಣು).

16 2 व्यभिनः—वि+भिद् ದ್ವೈಧೀಕರಣಾರ್ಥಕ (ಒಡೆದುಹಾಕುವುದು) स. प. श्नम् ವಿಕರಣ. लङ् म. ए. रुधादिगण ಒಡೆದೆ.

16 3 अनुतापात्—ಪಶ್ಚಾತ್ತಾಪದದೆಸೆಯಿಂದ.

16 4 शूरस्य गोत्रापत्यं पुमान्—शौरिः. ಶೂರವಂಶದಲ್ಲಿ ಹುಟ್ಟಿದವನು. (ಕೃಷ್ಣ) त. वृ.

17 5 दाम्ना+उदरम् ಗುಣಸಂಧಿ. ಹಗ್ಗದಿಂದ ಹೊಟ್ಟೆಯನ್ನು. दामन् न ಕಾರಾಂತ ನಪುಂಸಕಲಿಂಗ ತೃತೀಯಾ.

17 6 चेष्टोपरोधच्छलतः—चेष्टायाः उपरोधः ष. त. ಚೇಷ್ಟೆಯ ಕೆಡಕು ಮಾಡುವ ವ್ಯಾಪಾರದ ಅಡ್ಡಿ. तस्य छलं ष. त. ಅದರ ನೆಪ तस्मात् च . . . तः. ಅದರ ದೆಸೆಯಿಂದ पञ्चम्याः तसिल्.

17 7 भृगोः+नंदनः ष. त. ಭೃಗುವಿನ ಮಗ (ವಂಶದಲ್ಲಿ ಹುಟ್ಟಿದವನು) ಪರಶುರಾಮ. ಭೃಗುವಿನ ಮಗ ಋಚೀಕ. ಅವನ ಮಗ ಜಮದಗ್ನಿ. ಅವನ ಮಗ ಪರಶುರಾಮ. (ಭೃಗುವಿನ ಮೊಮ್ಮಗನ ಮಗ). तस्य भावः त. वृ.

18 8 किरिः=ಹಂದಿ (ವರಾಹಾವತಾರ).

18 9 निगूढः—ಗುಪ್ತವಾಗಿರುವ.

18 10 बिभ्युः—भी. 3 उ. प. स. लिट् प्र. ब. बिभाय (ए.) बिभ्यतुः (द्वि.) बिभ्युः (ब.)

18 11 कालीयः—ಕಾಲೀಯನೆಂಬ ಕೃಷ್ಣಸರ್ಪ.

18 12 निष्कासितः—ದೂರ ಎಸೆಯಲ್ಪಟ್ಟವನು.

18 13 तुदसि—6 अ ವಿಕರಣ प. स. लट् म. ए.

19 14 निदानम्—ಆದಿಕಾರಣ (ಮೂಲಕಾರಣ).

19 15 ध्मा ಧಾತುವಿಗೆ धम् ಆದೇಶ. 1 प. स. लट म. ए. ಊದು ತ್ತೀಯೆ (ಗಾನಮಾಡುತ್ತೀಯೆ).

पुटम्. संख्या.

19 16 **सिंहगन्धम्—सिंहस्य गन्धः ष. त.** ಸಿಂಹದ ಮದ (ಸೊಕ್ಕು) ಅಥವಾ ವಾಸನೆ.

19 17 **कुन्त्याः + अपत्यं पुमान् कैन्तेयः त. बृ.** ಕುಂತಿಯ ಮಗ (ಅರ್ಜುನ) **तेन** ನಿಂದ.

19 18 **निघ्नेन**—ಅಧೀನನಾದ **(अधीनो निघ्न आयत्तः)** ಎಂದು ಅಮರ.

19 19 **अघात्**—ಪಾಪದಿಂದ, **भीत्रार्थानां भयहेतुः** ಎಂದು ಅಲ್ಲಿ ಪಂಚಮೀ ಬಂದಿರುತ್ತದೆ. **भीः** ಎಂಬ ಶಬ್ದದ ಯೋಗದಿಂದ ಪಂಚಮೀ.

कर्णाश्वत्थामवैमनस्यम्.

टपुम्. संख्या.

21 1 **आकृष्टखड्गः**—आकृष्टः खड्गः येन सः आकृष्टखड्गः स. ब.- ಒರೆಯಿಂದ ಎಳೆಯಲ್ಪಟ್ಟ ಕತ್ತಿಯುಳ್ಳವನು.

21 2 **अश्वत्थामा (पुं) नान्त अश्वत्थमा अश्वत्थामानौ अश्वत्थामानः.**

21 3 **समरस्य अवनिः तस्याः ष. त.** ಯುದ್ಧಭೂಮಿಯಿಂದ.

21 4 **गाण्डीवं अस्य अस्ति इति गाण्डीवी त. वृ.** ಗಾಂಡೀವವೆಂಬ ಧನುಸ್ಸುಳ್ಳವನು (ಅರ್ಜುನ).

21 5 **वृकस्य उदरमिव उदरं यस्य सः =वृकोदरः.** ತೋಳದ ಹೊಟ್ಟೆ ಯಂತಿರುವ ಹೊಟ್ಟೆಯುಳ್ಳವನು ಹೊಟ್ಟೆಬಾಕ (ಭೀಮ).

21 6 **रिपुघस्मरं**—ಶತ್ರುನಾಶಕವಾದ.

21 7 **सांग्रामिकं**—ಸಂಗ್ರಾಮಕ್ಕೆ (ಯುದ್ಧಕ್ಕೆ) ತಕ್ಕ.

21 8 **रथप्रतीक्षया**—ರಥವನ್ನು ಕಾಯುವುದರಿಂದ (ರಥದ ನಿರೀಕ್ಷಣೆಯಿಂದ).

21 9 **कलधौतत्सरुणा**—ಚಿನ್ನದ ಹಿಡಿಯುಳ್ಳ. ಚಿನ್ನ ಅಥವಾ ಬೆಳ್ಳಿ=**कलधौतं**, **त्सरुः**=ಹಿಡಿ, **कलधौतस्य त्सरुः यस्य तत् कलधौतत्सरु, तेन व्य. ब.**

21 10 **स्पन्दः**—ಅದುರುವಿಕೆ.

21 11 **अवष्टंभेन सह वर्तते यस्मिन्कर्मणि तद्यथा भवति तथा, स. ब.** ಗರ್ವದೊಡನೆ ಕೂಡಿರುವುದು ಹೇಗೋ ಹಾಗೆ.

21 12 **अवधीरितः**—ತಿರಸ್ಕರಿಸಲ್ಪಟ್ಟ (ಬಿಟ್ಟ).

21 13 ಶಸ್ತ್ರಾಸ್ತ್ರಸುಶಿಕ್ಷಿತರಾದ ಹತ್ತುಸಾವಿರ ಯೋಧರೊಡನೆ ತನ್ನನ್ನೂ ತನ್ನ ಸಾರಥಿಯನ್ನೂ ತನ್ನ ರಥ ಮತ್ತು ಕುದುರೆಗಳನ್ನೂ ಒಂದು **ಏಟೂ ಬೀಳ** ದಂತೆ ಕಾಪಾಡಿಕೊಂಡು ಕಾದುವ ವೀರ=**महारथः**.

21 14 **ताताधिष्ठितस्य**—ತಂದೆಯು ಸೇನಾಪತಿಯಾಗಿರುವ.

21 15 **संस्तम्भयामि**—ತಡೆಯುವೆನು (ಯುದ್ಧಕ್ಕೆ ಹಿಂತಿರುಗಿಸುವೆನು).

22 16 **वीरस्वर्गमारूढवति पितरि**—ತಂದೆಯು ವೀರಸ್ವರ್ಗವನ್ನು ಹತ್ತಲು (ಸತಿಸಪ್ತಮಿಯ ಪ್ರಯೋಗ) (ತಂದೆಯು ಸಾಯಲು).

22 17 **संख्ये**—ಯುದ್ಧದಲ್ಲಿ.

22 18 **तुलां**—ಹೋಲಿಕೆಯನ್ನು.

पुटम्. संख्या.

23 19 **परिदेवनेन**—ಅಳುವುದರಿಂದ.

23 20 **यावदुपसर्पामि यावत्पुरानिपातयोर्लट्.**—ಎಂದು ಭವಿಷ್ಯತ್ಕಾಲಕ್ಕೆ ಬದಲಾಗಿ **यावत्** ಎಂಬುದರ ಯೋಗದಿಂದ **लट्** ಬಂದಿರುತ್ತದೆ. **=उपसर्पिष्यामि.**

23 21 **न जाताः = अजाताः. (नञ्. त.) अजाताः + शत्रवः यस्य सः = अजातशत्रुः स. ब.** ಹುಟ್ಟದ ಶತ್ರುಗಳುಳ್ಳವನು.

23 22 **निरस्तम्**—ಬಿಡಲ್ಪಟ್ಟಿತು. **निर् + अस् + त. (कर्मणि क्तः). असु—क्षेपणे** ಎಂಬ ಧಾತುವಿನ ಮೇಲೆ ಹುಟ್ಟಿದುದು.

23 23 **कण्डूः**—ನವೆ. (ಆಸಕ್ತಿ).

23 24 **निकषणः**—ತಿಕ್ಕುವವನು. (ಹೋಗಲಾಡಿಸುವವನು).

23 25 **स्वसा**—ತಂಗಿ. **(स्त्री) ऋ** ಕಾರಾಂತ.

24 26 **परिदेवितं**—ಅಳುವಿಕೆ.

24 27 **व्यवसितं**—ಪ್ರಯತ್ನವು.

24 28 **निवापाञ्जलिदानेन**—ತಿಲತರ್ಪಣವನ್ನು ಕೊಡುವುದರಿಂದ.

24 29 **प्राणान् (पु. नि. ब.)** ಐದು ಪ್ರಾಣಗಳನ್ನು.

24 30 **उद्देशम् (पु.)** ಉತ್ಕೃಷ್ಟವಾದ ದೇಶವನ್ನು.

24 31 **परिभवः.**—ತಿರಸ್ಕಾರ.

24 32 **विमोक्ष्ये—वि + मुच्. लृट् श्नम्.** ವಿಕರಣ. **प. स. क. उ. ए.**—ಬಿಡುವೆನು. 1ನೆಯ ಭವಿಷ್ಯತ್.

24 33 **स्वस्ति भवते.—' नमः स्वस्ति स्वाहा स्वधा अलं वषड्योगाच्च.** ಎಂದು **स्वस्ति** ಎಂಬುದರ ಯೋಗದಿಂದ ಚತುರ್ಥೀವಿಭಕ್ತಿ ಬಂದಿದೆ.

24 34 **नृशंसः—घातुकः क्रूरः** ಎಂದು ಅಮರ—ದಯೆಯಿಲ್ಲದವನು. (**नृ + शंस्** ಮನುಷ್ಯನೆಂದು ಹೇಳಿಕೊಳ್ಳುವವನು) ಸರಿಯಾಗಿ ಮನುಷ್ಯತ್ವವಿಲ್ಲವೆಂದು ಭಾವ.

24 35 **भारद्वाजस्य—भारद्वाजस्य अपत्यं पुमान्—भारद्वाजः** ಭರದ್ವಾಜನ ಮಗ. **त. वृ.**.

24 36 **नेपथ्ये**—ತೆರೆಯೊಳಗೆ. ನಾನಾರ್ಥ. (ಆಭರಣವನ್ನು ಧರಿಸುವುದು. ನಾಟಕಗಳಲ್ಲಿ ಪಾತ್ರಗಳಿಗೆ ಅಲಂಕಾರಮಾಡುವ ಸ್ಥಳ).

24 37 **पलितं**—ನರೆ. (ಮುಪ್ಪಿನಿಂದ ಕೂದಲು ಬಿಳುಪಾಗುವುದು).

24 38 **शिबिरं**—ಸೇನಾನಿವಾಸಸ್ಥಳ. ಬಿಡಾರ.

25 39 **जनः**—ಏಕವಚನದ ಜನಶಬ್ದವು ಸಮುದಾಯಾರ್ಥಕ. ಜನಗಳ ಗುಂಪು.

पुटम्. संख्या.

25 40 **परिमृष्टम्**—ಮುಟ್ಟಲ್ಪಟ್ಟಿತು. **परि+मृश्+कर्मणि क्तः.**

25 41 **परिभावितः—परि + भू + णिच् + कर्मणि क्तः** = ತಿರಸ್ಕಾರ ಹೊಂದಿಸಲ್ಪಟ್ಟಿತು.

25 42 **आजौ**—ಯುದ್ಧದಲ್ಲಿ.

25 43 **उत्तमाङ्गम्**—ಶಿರಃ. ತಲೆಯನ್ನು (**न**).

25 44 **विदधत्**—ಇಡುವವನಾಗಿ. '**नाभ्यस्ताच्छतुः**' ಎಂದು **विधधा** ಎಂಬುದು ಅಭ್ಯಸ್ತಸಂಜ್ಞೆಯನ್ನು ಹೊಂದುವುದರಿಂದ **अत्** ಎಂಬ ಪ್ರತ್ಯಯಕ್ಕೆ **नुम्** ಆಗಮವಿಲ್ಲ.

25 45 **युधि + स्थिरः = युधिष्ठिरः** = ಯುದ್ಧದಲ್ಲಿ ಅಲುಗಾಡದೆ ಇರುವವನು. **स. त.** ಸಪ್ತಮಿಗೆ ಲೋಪವಿಲ್ಲ. **अलुग्वृत्तिः** (ಮಧ್ಯಗತವಿಭಕ್ತಿಗೆ ಲೋಪವಿಲ್ಲದ ವೃತ್ತಿ).

25 46 **नरकरिपुणा सार्धं**—ನರಕನೆಂಬ ರಾಕ್ಷಸನಿಗೆ ಶತ್ರುವಾದ ಕೃಷ್ಣನೊಡನೆ. '**सहयुक्ते अप्रधाने**' ಎಂದು **सार्धं** ಎಂಬುದು ಸಹಾರ್ಥಕವಾದುದರಿಂದ ತೃತೀಯಾ ಬಂದಿದೆ. ಉಪಪದವಿಭಕ್ತಿ ಇದು.

25 47 **असृक्**—ರಕ್ತ.

25 48 **न प्रभवति किं**—ಶಕ್ತನಾಗುವುದಿಲ್ಲವೆ?

25 49 **स्यन्दनम्**—ರಥವನ್ನು.

26 50 **प्रतिकर्तव्ये**—ಮುಯ್ಯಿಗೆ ಮುಯ್ಯನ್ನು ತೀರಿಸುವ ವಿಷಯದಲ್ಲಿ.

26 51 **प्रतिविधातुम्**—ಹಗೆಯನ್ನು ತೀರಿಸಲು.

26 52 **धार्तराष्ट्रबलं**—ಕೌರವನ ಸೈನ್ಯವನ್ನು. **धृतं राष्ट्रं येन सः धृतराष्ट्रः, तस्य अपत्यं पुमान्=धार्तराष्ट्रः**-ಧೃತರಾಷ್ಟ್ರನ ಮಗ. **त. वृ. तस्य बलं ष. त.**

26 53 **परिपन्थिभवितुं**—ಹಿಂದೆ ಶತ್ರುವಲ್ಲದವನು ಶತ್ರುವಾಗಿ ಈಗ ಆಗಲು (ಹಗೆಯಾಗಲು). **अभूततद्भावे च्विः. परिपन्थी** = ಶತ್ರು. **प्रत्यर्थिपरिपन्थिनः** ಎಂದು ಅಮರ.

26 54 **अभ्यपेक्षमाणः**—ಎದುರುನೋಡುವವನಾಗಿ.

26 55 **परिभवानलदह्यमानं—परिभव एव अनलः सं. क. तेन दह्यमानम् तृ. त.** ತಿರಸ್ಕಾರವೆಂಬ ಬೆಂಕಿಯಿಂದ ಸುಡಲ್ಪಟ್ಟ.

26 56 **प्रतीकारजलावगाहनाय—प्रतीकार एव जलं, तस्मिन् अवगाहनम्**=ಹಗೆ ತೀರಿಸಿಕೊಳ್ಳುವುದೆಂಬ ನೀರಿನಲ್ಲಿ ಮುಳುಗಲು.

26 57 **सेनायाः पतिः=सेनापतिः, तस्य भावः सेनापत्यं**—ಸೇನಾಪತಿಯ ಭಾವ. ಮುಖ್ಯಸೇನಾಪತಿಯ ಭಾವ. (ಸೈನ್ಯದ ಮುಖ್ಯಾಧಿಕಾರ.)

पुटम्. संख्या

26 58 **राजकं—राज्ञां समूहः=राजकं**—ರಾಜರ ಗುಂಪು.

26 59 **उपेक्षा—औदासीन्यं**—ಸುಮ್ಮನಿರುವಿಕೆ.

27 60 **अतिरथः**—ಮಹಾರಥನಿಗಿಂತಲೂ ಮೇಲಾದ ವೀರ.

27 61 **न्यग्रोधः**—ಆಲದಮರ.

27 62 **विजयतां**—ಜಯಶೀಲನಾಗಬೇಕು. '**विपराभ्यां जेः**' ಎಂದು **वि** ಮತ್ತು **परा** ಎಂಬ ಉಪಸರ್ಗಗಳ ಯೋಗದಿಂದ ಪರಸ್ಮೈಪದವಾದ **जि** ಧಾತುವು ಆತ್ಮನೇಪದವಾಗುತ್ತದೆ.

27 63 **प्रतीपः**—ಅಡ್ಡಿಯಾದವನು, ಎದುರಾದವನು.

28 64 **उच्छेत्तुं**—ನಾಶಮಾಡಲು.

28 65 **अङ्गानां राजा—अङ्गराजः** '**राजा अहस्सखिभ्यः टच्**' ಎಂದು ಸಮಾಸಾಂತವಾಗಿ **टच्** ಪ್ರತ್ಯಯ ಬಂದು **अङ्गराजन्** + **अ** = **अङ्गराज्** + **अ**=**अङ्गराजः** ಎಂದು ಅಕಾರಾಂತ.

28 66 **निस्सोमकं**—ನಾಶಹೊಂದಿದ ಸೋಮಕರುಳ್ಳದ್ದನ್ನಾಗಿ. ಪಾಂಚಾಲ ರಾಜರ ವಂಶ ಸೋಮಕವಂಶ. ದೃಷ್ಟದ್ಯುಮ್ನ, ದ್ರುಪದ ಮೊದಲಾದ ವರೆಲ್ಲರನ್ನೂ ಕೊಲ್ಲುವೆನೆಂದು ಭಾವ.

28 67 **अरातिः**—ಶತ್ರು.

28 68 **वाचाट**—ನಿರರ್ಥಕವಾಗಿ ಹೆಚ್ಚು ಮಾತಾಡುವವನೇ.

28 69 **दुर्विदग्ध**—ಕೊಬ್ಬಿದವನೇ.

29 70 **स्यः—सः**=ಅವನು.

30 71 **शोणितासवं**—ರಕ್ತವೆಂಬ ಮದ್ಯವನ್ನು

30 72 ನನ್ನ ಭುಜವೆಂಬ ತಪ್ಪಿಸಿಕೊಂಡು ಹೋಗಲಾರದ ಸ್ಥಳದಲ್ಲಿ ಬಿದ್ದ ಆ ಇವನು ಕಾಪಾಡಲ್ಪಡಲಿ. ಕೌರವರೇ ಎಂದು ಸಂಬೋಧನೆ, ಅಥವಾ **कौरवः** ಎಂದು ಪಾಠವಿದ್ದರೆ ಆ ಈ ಕುರುವಂಶರಾಜನು ಕಾಪಾಡಲ್ಪಡಲಿ.

31 73 **भवानपि प्रतिष्ठताम्—स्था** ಧಾತುವು ಪರಸ್ಮೈಪದ. **प्र** ಎಂಬ ಉಪಸರ್ಗದ ಯೋಗದಿಂದ ಆತ್ಮನೇಪದವಾಗಿದೆ. '**समवप्रविभ्यस्तः**' ಎಂದು ಅನುಶಾಸನ. **भवत्** ಶಬ್ದವು ಯುಷ್ಮದರ್ಥಕವಾದರೂ **युष्मद्** ಶಬ್ದವಲ್ಲವಾದುದರಿಂದ ಮಧ್ಯಮಪುರುಷವು ಇಲ್ಲಿ ಬಂದಿಲ್ಲ.

ಕೆಲವು ವ್ಯಾಕರಣವಿಶೇಷಗಳು.

अलमिदानीं रथप्रतीक्षया—ರಥವನ್ನು ನಿರೀಕ್ಷಿಸುವುದರಿಂದ ಸಾಕು.

कृतं समरपरित्यागसाहसेन—ಯುದ್ಧವನ್ನು ಬಿಡುವ ಸಾಹಸದ ಕೆಲಸದಿಂದ ಸಾಕು.

—ಈ ಎರಡು ವಾಕ್ಯಗಳಲ್ಲಿಯೂ '**गम्यमानापि क्रिया कारकविभक्तेः प्रयोजिका**' ಎಂದು ಅಧ್ಯಾಹೃತವಾಗುವ '**साध्यं नास्ति**' ಎಂಬ ಕ್ರಿಯೆಯ ಯೋಗದಿಂದ ತೃತೀಯೆಯು ಬರುತ್ತದೆ.

खड्गेन सशस्त्रः—ಕತ್ತಿಯಿಂದ ಆಯುಧವುಳ್ಳವನು—ಇಲ್ಲಿ ತೃತೀಯಾವಿಭಕ್ತಿಗೆ ಅಭೇದ ಅರ್ಥ. ಕತ್ತಿಯೆಂಬ ಶಸ್ತ್ರದಿಂದ ಕೂಡಿದವನು. '**धान्येन धनवान्**' ಎಂಬಂತೆ.

अर्धरात्रः—'**अहः सर्वैकदेशसङ्ख्यातपुण्याच्च रात्रेः**' ಎಂಬ ನಿಯಮವು ಹೇಳುವಂತೆ **अर्ध** ಶಬ್ದವು ಪೂರ್ವಪದವಾಗಿ **रात्रि** ಶಬ್ದವು ಉತ್ತರಪದವಾಗಿ ರುವ ಸಮಾಸವು **अच्** ಎಂಬ ಸಮಾಸಾಂತಪ್ರತ್ಯಯವನ್ನು ಹೊಂದುತ್ತದೆ. ಇದು ಪುಲ್ಲಿಂಗವೂ ಆಗಿರುತ್ತದೆ.

तस्य तुलाम्—'**तुल्यार्थैरतुलोपमाभ्यां तृतीया च**' ಎಂಬ ನಿಯಮದಂತೆ ಷಷ್ಠಿಯು ಇಲ್ಲಿ ಬಂದಿರುತ್ತದೆ. ತೃತೀಯೆಯೂ ಬರಬಹುದು.

जात्या त्वमवध्यः—'**प्रकृत्यादिभ्य उपसङ्ख्यानम्**' ಎಂಬ ವಾರ್ತಿಕದಿಂದ ಇಲ್ಲಿ **जाति** ಶಬ್ದದ ಮೇಲೆ ತೃತೀಯೆಯು ಬಂದಿದೆ.

बहूनि दिवसानि मया पराजितेन — कालाध्वनोरत्यन्तसंयोगे ಎಂದು ದ್ವಿತೀಯಾ.

युधिष्ठिरः—'**हलदन्तात्सप्तम्याः संज्ञायां**' ಎಂದು ಸಪ್ತಮಿಗೆ ಲೋಪವಿಲ್ಲದುದಕ್ಕೆ ಅನುಶಾಸನ.

चारुदत्तस्य अनुकरोति—'**तुल्यार्थैरतुलोपमाभ्यां तृतीया च**' ಎಂದು ಷಷ್ಠಿಯು ಬಂದಿದೆ. ಹೋಲುತ್ತಾನೆ ಎಂದು ಉಪಮಾರ್ಥಕವಾದ ಪದದ ಸಂಬಂಧ ವಿರುತ್ತದೆ.

दास्याः पुत्रः—'**पुत्रे अन्यतरस्यां**' ಎಂದು ನಿಂದೆಯು ತೋರುವಾಗ ಷಷ್ಠಿಗೆ ವಿಕಲ್ಪವಾಗಿ ಲೋಪವು ಬರುವುದರಿಂದ ಇದು ಅಲುಗ್ವೃತ್ತಿ.

सैनापत्यं--'**पत्यन्तपुरोहितादिभ्यो यक्**' ಎಂದು **सेनापति+यक्=सैनापत्यं** ಎಂದು ತದ್ಧಿತಭಾವನಾಮವಾಗಿದೆ.

धिक् त्वाम्—'**कर्मप्रवचनीययुक्ते द्वितीया**' ಎಂದು **धिक्** ಎಂಬುದರ ಯೋಗ ದಿಂದ **त्वाम्** ಎಂದು ದ್ವಿತೀಯೆಯು ಬಂದಿರುತ್ತದೆ. ಇದೂ ಉಪಪದ ವಿಭಕ್ತಿ.
